SAHITYA

ACHARYA I st YEAR

Paper - IV

KADAMBARI

(Kathamukham)

(PART - A)

Directorate of Distance Education

Rashtriya Sanskrit Vidyapeetha

Accredited at A level by NAAC

Tirupati - 517 507 (A.P.)

कादम्बरी

मङ्गलाचरणम्

रजोजुषे जन्मनि सत्त्ववृत्तये स्थितौ प्रजानां, प्रलये तमःस्पृशे।
अजाय सर्गस्थितिनाशहेतवे त्रयीममाय त्रिगुणात्मने नमः।। १ ।।

जयन्ति बाणासुरमौलिलालिता दसास्यचूडामणिचक्रचुम्बिनः।
सुरासुराधीशशिखान्तशायिनो भवच्छिदस्त्र्यम्बकपादपांसवः।। २ ।।

जयत्युपेन्द्रः स चकार दूरतो बिभित्सया यः क्षणलब्ध–लक्ष्यया।।
दृशैव कोपारुणया रिपोरुरः स्वयं भयाद्भिन्नमिवास्रपाटलम्।। ३ ।।

नमामि भर्वोश्चरणाम्बुजद्वयं सशेखरैर्मौखरिभिः कृतार्च्चनम्।
समस्तसामन्तकिरीटवेदिका–विटङ्कपीठोल्लुठितारुणाङ्गुलि।। ४ ।।

सज्जनदुर्जनयोःस्तुतिनिन्दे

अकारणाविष्कृतवैरदारुणादसज्जनात कस्य भयं न जायते।
विषं महाहेरिव यस्य दुर्वचः सुदुःसहं सन्निहितं सदा मुखे।। ५ ।।

कटु क्वणन्तो मलदायकाः खलास्तुदन्त्यलं बन्धनश्रृङ्खला इव।
मनस्तु साधुध्वनिभिः पदे पदे हरन्ति सन्तो मणिनूपुरा इव।। ६ ।।

सुभाषितं हारि विशत्यधो गलान्न दुर्जनस्यार्करिपोरिवामृतम्।
तदेव धत्ते हृदयेन सज्जनो हरिर्महारत्नमिवातिनिर्मलम्।। ७ ।।

कथाप्रशंसा

स्फुरत्कलालापविलासकोमला करोति रागं हृदि कोतुकाधिकम्।
रसेन शय्यां स्वयमभ्युपागता कथा जनस्याभिनवा वधूरिव।। ८ ।।

हरन्ति कं नोज्ज्वलदीपकोपमैर्नवैः पदार्थैरुपपादिताः कथाः।
निरन्तरश्लेषघनाः सुजातयो महास्रजश्चम्पककुड्मलैरिव।। ९ ।।

कविवंशवर्णनम्

बभूव वात्स्यायनवंशसम्भवो द्विजो जगद्गीतगुणोऽग्रणीः सताम्।
अनेकगुप्तार्चितपादपङ्कजः कुबेरनामांश इव स्वयम्भुवः।। १० ।।

उवास यस्य श्रुतिशान्तकल्मषे सदा पुरोडाशपवित्रिताधरे।
सरस्वती सोमकषायितोदरे समस्तशास्त्रस्मृतिबन्धुरे सुखे।। ११ ।।

जगुर्गृहेऽभ्यस्तसमस्तवाङ्मयैः ससारिकैः पञ्जरवर्त्तिभिः शुकैः।
निगृह्यमाणा बटवः पदे पदे यजूंषि सामानि च यस्य शङ्किताः।। १२ ।।

हिरण्यगर्भो भुवनाण्डकादिव क्षपाकरः क्षीरमहार्णवादिव।
अभूत् सुपर्णो विनतोदरादिव द्विजन्मामर्थपतिः पतिस्ततः।। १३ ।।

विवृण्वतो यस्य विसारि वाङ्मयं दिने दिने शिष्यगणा नवा नवा।
उषस्तु लग्नाः श्रवणोऽधिकां श्रियं प्रचक्रिरे चन्दनपल्लवा इव।। १४ ।।

विधानसम्पादितदानशोभितैः स्फुरन्महावीरसनाथमूर्त्तिभिः।
मखैरसंख्यैरजयत् सुरालयं सुखेन यो यूपकरैर्गजैरिव।। १५ ।।

स चित्रभानुं तनयं महात्मनां सुतोत्तमानां श्रुतिशास्त्रसालिनाम्।
अवाप मध्ये स्फटिकोपलामलं क्रमेण कैलासमिव क्षमाभृताम्।। १६ ।।

महात्मनो यस्य सुदूरनिर्गताः कलङ्कमुक्तेन्दुकलामलत्विषः।
द्विषन्मनः प्राविविशुः कृतान्तरा गुणानृसिंहस्य नखाङ्कुशा इव।। १७ ।।

दिशामलीकालकभङ्गतां गतस्त्रयीवधूकर्णतमालपल्लवः।
चकार यस्याध्वरधूमसञ्चयोः मलीमसः शुक्लतरं निजं यशः।। १८ ।।

सरस्वतीपाणि–सरोजसम्पुट–प्रमृष्टहोमश्रमशीकराम्भसः।
यशोंऽशुशुक्लीकृतसप्तविष्टपात्ततः सुतो बाण इतिव्यजायत।। १९ ।।

द्विजेन तेनाक्षतकण्ठकौण्ठ्यया महामनोमोहमलीमसान्धया।
अलब्धवैदग्ध्यविलासमुग्धया धिया निबद्धेयमतिद्वयी कथा।। २० ।।

कथा-मुखम्
शूद्रकवर्णनम्

आसीदशेष-नरपति-शिरः-समभ्यर्च्चित-शासनः पाकशासन इवापरः, चतुरुदधिमालामेखलाया भुवो भर्त्ता, प्रतापानुरागावनत-समस्त-सामन्तचक्रः, चक्रवर्तिलक्षणोपेतः, चक्रधर इव करकमलोपलक्ष्यमाण-शङ्ख-चक्र-लाञ्छनः, हर इव जितमन्मथः, गुह इवाप्रतिहतशक्तिः, कमलयोनिरिव विमानीकृत-राजहंसमण्डलः, जलधिरिव लक्ष्मीप्रसूतिः, गङ्गाप्रवाह इव भगीरथपथप्रवृत्तः, रविरिव प्रतिदिवसो-पजायमानोदयः मेरुरिव सकलोपजीव्यमानपादच्छायः, दिग्गज इवानवरतप्रवृत्तदानार्द्रीकृतकरः कर्त्ता महाश्चर्य्याणाम्, आहर्त्ता क्रतूनाम्, आदर्शः सर्वशास्त्राणाम्, उत्पत्तिः कलानाम्, कुलभवनं गुणानाम्, आगम: काव्यमृतरसानाम्, उदयशैलो मित्रमण्डलस्य, उत्पातकेतुरहितजनस्य, प्रवर्त्तयिता गोष्ठीबन्धा- नाम्, आश्रयो रसिकानाम्, प्रत्यादेशो धनुष्मताम्, धौरेयः साहसिकानाम्, अग्रणीविदग्धानाम्, वैनतेय इव विनतानन्दजननः, वैन्य इव चापकोटिसमुत्सारितसकलारातिकुलाचलो राजा शूद्रको नाम।

नाम्नैव यो निर्भिन्नारातिहृदयो विरचितनरसिंहरूपाडम्बरम्, एकविक्रमाक्रान्तसकलभुवनतलो विक्रमत्रयायासितभुवतत्रयं जहासेव वासुदेवम्।

अतिचिरकाललग्नमतिक्रान्तकुनृपतिसहस्रसम्पर्ककलङ्कमिव क्षालयन्ती यस्य विमले कृपाणधाराजले चिरमुवास राजलक्ष्मीः।

यश्च मनसि धर्म्मेण, कोपे-यमेन, प्रसादे धनदेन, प्रतापे वह्निना, भुजे भुवा, दृशि श्रिया, वाचि सरस्वत्या, सुखे शशिना, बले मरुता, प्रज्ञायां सुरगुरुणा, रूपे मनसिजेन, तेजसि सवित्रा च वसत सर्वदेवमयस्य प्रकटितविश्वरूपाकृतेरनुकरोति भगवतो नारायणस्य।

यस्य च मदकल-करि-कुम्भ-पीठपाटनमाचरत। लग्न-स्थूलमुक्तफलेन, दृढ-मुष्टिनिष्पीडन निपीडनात् निष्ठ्यूततलः'।-निष्ठ्यृत-धाराजलबिन्दु-दन्तुरेव कृपाणेनाकृष्यमाणा सुभटोरः- कपाट-विघटितैकवच-सहस्रान्धकार-मध्यवर्त्तिनी करि-करट-गलित- मदजलासार-दुर्दिनास्वभिसारिकेव सभरनिशासु समीपमसकृदाजगाम राजलक्ष्मीः।

यस्य च हृदयस्थितानपि पतीन् दिधक्षुरिव प्रतापानलो वियोगिनीनामपि रिपुसुन्दरीणामन्तर्जनितदाहो दिवानिशं जज्वाल।

यस्मिंश्च राजनि जितजगति परिपालयति महीं चित्रकर्म्मसु वर्णसङ्कराः, रतेषु केशग्रहाः, काव्येषु दृढबन्धाः, शास्त्रेषु चिन्ता, स्वप्नेषु विप्रलम्भाः, छत्रेषु कनकदण्डाः, ध्वजेषु प्रकम्पाः गीतेषु रागविलसितानि, करिषु मदविकाराः, चापेषु गुणच्छेदाः, गवाक्षेषु जालमार्गाः, शशिकृपाणकवचेषु कलङ्काः, रतिकलहेषु दूतसम्प्रेषणानि, सार्य्यक्षेषु शून्यगृहा:प्रजानामासन्।

यस्य च परलोकाद्भयम्, अन्तःपुरिकालकेषु भङ्गः, नूपुरेषु मुखरता, विवाहेषु करपीडनम्, अनवरतमखाग्निधूमेनाश्रुपातः तुरगेषु कशाभिघातः, मकरध्वजे चापध्वनिरभूत्।

तस्य च राज्ञः कलिकाल-भयपुञ्जीभूत-कृतयुगानुकारिणी त्रिभुवनप्रसवभूमिरिव विस्तीर्णा मज्जन्मालवविलासिनीकुचतटास्फालन-जर्जरितोर्म्मिकारिणी जलावगाहनावतारित -जयकुञ्जर- कुम्भ-सिन्दूर-सन्ध्यायमान-सलिलया उन्मद-कलहंस-कुला-कोलाहल मुखरित-कूलया वेत्रवत्या परिगता विदिशाभिधाना नगरी राजधान्यासीत्।

स तस्यामवजिताशेष-भुवनमण्डलतया विगतराज्यचिन्ताभारनिवृत्तिः, द्वीपान्तरागतानेक-भूमिपाल-मौलिमाला-लालित-चरणयुगलो वलयमिव लीलया भुजेन भुवनभारमुद्वहन्, अमरगुरुमपि प्रज्ञयोपहसद्भिरनेक-कुलक्रमागतैरसकृदालोचित-नीतिशात्रनिर्म्मलमनोभिरलुब्धैः स्निग्धैः प्रबुधैश्चामात्यैः परिवृतः,समानवयोविद्यालङ्कारैरनेक-मूर्द्धाभिषिक्त-पार्थिवकुलोद्गतैरखिल-कलाकलापालोचन-कठोर-मतिभिरतिप्रगल्भैः कालविद्भिः प्रेमानुरक्तहृदयैरग्राम्यपरिहासकुशलैरिङ्गिताकारवेदिभिः काव्यनाटका-व्यानकाख्यायिकालेख्यव्याख्यानादि-क्रियानिपुणैरतिकठिन-पीवर-स्कन्धोरु-बाहुभिरसकृदवदलित-समद-रिपुगजघटा-पीठबन्धैः केसरिकिशोरकैरिव, विक्रमैकरसैरपि विनयव्यवहारिभिरात्मनः प्रतिबिम्बैरिव राजपुत्रैः सह रममाणः प्रथमे वयसि सुखमतिचिरमुवास।

तस्य चातिविजीगीषुतया महासत्त्वतया च तृणमिव लघुवृत्ति स्त्रैणमाकलयतः प्रथमे वयसि वर्तमानस्यापि रूपवतोऽपि सन्तानार्थिभिरमात्यैरपेक्षितस्यापि सुरसुखस्योपरि द्वेष इवासीत्।

सत्यपि रूपविलासोपहसित-रतिविभ्रमे लावण्यवति विनयवत्यन्वयवति हृदयहारिणि चावरोधजने, स कदाचिदनवरतदोलायमान-रत्नवलयो घर्घरिकास्फालन- प्रकम्प- झणझणायमान- मणिकर्णपूरः स्वयमा-रब्धमृदङ्गवाद्यः सङ्गीतकप्रसङ्गेन, कदाचिदविरल- विमुक्तशरासार- शून्यीकृतकाननो मृगयाव्यापारेण, कदाचिदाबद्धविदग्धमण्डलः काव्यप्रबन्धरचनेन, कदाचिच्छास्त्रालापेन, कदाचिदाख्यानकाख्यायिकेतिहासपुराणाकर्णनेन, कदाचिदालेख्यविनोदेन, कदाचिद्वीणया, कदाचिद्दर्शनागत-मुनिजल-चरणशुश्रूषया,कदाचिदक्षरच्युतकमात्राच्युतक-बिन्दुमती-गूढचतुर्थपाद- प्राहेलिका-प्रदानादिभिः,वनिता- सम्भोगसुख- पराङ्मुखः सुहृत्परिवृतो दिवसमनैषीत्। यथैव च दिवसमेवमारब्ध-विविध-क्रीडा-परिहास-चतुरैः सुहृद्भिरुपेतो निशामनैषीत्।

एकदा तु नातिदूरोदिते नव-नलिन-दलसम्पुट-भिदि किञ्चिन्मुक्त-पाटलिम्नि भगवति सहस्रमरीचिमालिनि, राजानमास्थानमण्डपगतमङ्गनाजनविरुद्धेन वामपार्श्वावलम्बिता कौक्षेयकेण सन्निहितविषधरेव चन्दनलताभीषणरमणीयाकृतिः, अविरलचन्दनानुलेपनधवलित-स्तनतटा उन्मज्जदैरावतकुम्भमण्डलेव मन्दाकिनी, चूडामणिसंक्रान्तप्रतिबिम्बच्छलेनराजाज्ञेव मूर्तिमती राजभिः शिरोभिरुह्यमाना, शरदिव कलहंसधवलाम्बरा, जामदग्न्यपरशुधारेव वशीकृतसकलराजमण्डला,

विन्ध्यवनभूमिरिव वेत्रलतावती, राज्याधिदेवतेव विग्रहिणी, प्रतीहारी समुपसृत्य क्षितितल-निहित-जानु-करकमला सविनयमब्रवीत्-

'देव! द्वारस्थिता सुरलोकमारोहतस्त्रिशङ्कोरिव कुपितशतमखहुङ्कार-निपातिता राजलक्ष्मीर्दक्षिणापथादागाता चण्डाल-कन्यका पञ्जरस्थं शुकमादाय देवं विज्ञापयति-'सकलभुवनतल - सर्वरत्नानाम् उदधिरिवैकभाजनं देवः, विहङ्गमश्चायमाश्चर्य्यभूतो निखिल-भुवनतलरत्नमिति कृत्वा देवपालमूलमेनमादायागताऽहमिच्छामि देवदर्शनसुखमनुभवितुम्' इति। एतदाकर्ण्य देवः प्रमाणमि'त्युक्त्वा विरराम।

उपजातकुतूहलस्तु राजा समीपवर्त्तिनां राज्ञामवलोक्य ठको दोषः,प्रवेश्यताम्' इत्यादिदेश।

अथ प्रतीहारी नरपतिकथनानान्तरमुत्थाय तां मातङ्गकुमारीं प्रावेशयत्। प्रविश्य च स नरपतिसहस्र-मध्यवर्त्तिनमशनिभय-पुञ्जितकुलशैलमध्यगतमिव कनकशिखरिणम्, अनेकरत्नाभरण- किरण-जालकान्तरितावयवमिन्द्रायुध-सहस्र-सञ्छादिताष्टदिग्विभागमिव जलधरदिवसम्, अवलम्बित-स्थूलमुक्ताकलापस्य कनकशृङ्खला-नियमितमणिदण्डिकाचतुष्टयस्य गगन-सिन्धु-फेन-पटल- पाण्डुरस्य नातिमहतो दुकूलवितानस्याधस्तादिन्दु-कान्तमणिपर्य्यङ्किकानिषण्णम्, उद्धूयमान- कनकदण्डचामरकलापम्, उन्मयूखमुख-कान्तिनिचय-पराभवप्रणते शशिनीव विन्यस्तवामपादम्, इन्द्रनीलमणि-कुट्टिम-प्रभासम्पर्कश्यामायमानैः प्रणत-रिपु-निश्वासमलिनीकृतैरिव चरण- नखमयूख- जालैरुपशोभमानम्, आसोल्लसित-पद्मराग-किरण- पाटलीकृतेनाचिरमृदितमधु-कैटभरुधिरारुणेन हरीमिवोरुयुगलेन विराजमानम्, अमृतफेन-धवले गोरोचना-लिखित-हंस-मिथुन-सनाथ-पर्य्यन्ते चामार पवनप्रनर्त्तितान्तदेशे, दुकूले वसानम्, अतिसुरभि-चन्दनानुलेपन-धवलितोरःस्थलम्, उपरि-विन्यस्त- कुङ्कुम-स्थासकम्, अन्तरनिपतितबालातपच्छेदमिव कैलाशशिखरिणम्, अपर-शशि-शङ्कया नक्षत्रमालयेव हारलतया कृतमुखपरिवेषम्, अतिचपल-राज-लक्ष्मीबन्धनिगड-केयूरयुगलेन मलयज-रस-गन्धलुब्धेन भुजङ्गद्वयेनेव वेष्टितबाहुयुगलम्, ईषदालम्बि-कर्णोत्पलम्, उन्नत-घोणम्, उत्फुल्लपुण्डरीक-लोचनम्, अमलकलधौतपट्टायतम्, अष्टमीचन्द्र-शकलाकारम्, अशेष-भुवन- राज्याभिषेकसलिलपूतम्, ऊर्णासनाथं ललाटदेशमुद्वहन्तम्, आमोदित-मालतीकुसुम-शेखरम्, उषसि- शिखर-पर्य्यस्ततारकापुञ्जमिव पश्चिमालम्, आभरण-प्रभापिशङ्गिताङ्गतया लग्न-हर-हुताशमिव मकरध्वजम्, आसन्नवर्त्तिनीभिः। सेवार्थमागताभिरिव दिग्वधूभिर्वारविलासिनीभिः परिवृतम्, अमल-मणिकुट्टिमसंक्रान्त-सकल-देह-प्रतिबिम्बतया पतिप्रेम्णा वसुन्धरया हृदयेनेवोह्यमानम्, अशेषजनभोग्यतामुपनीतयाप्यसाधारणया राजलक्ष्म्या समालिङ्गितम्, अपरिमितपरिवारजन-मप्यद्वितीयम्, अनन्त-गज-तुरग-साधनमपि खड्गमात्रसहायम्, एकदेशस्थितमपि व्याप्तभुवनमण्डलम्, आसने स्थितमपि धनुषि निषण्णम्, उत्सादिताशेषद्विषदिन्धनमपि ज्वलत्प्रतापानलम्, आयतलोचनमपि 'सूक्ष्मद१र्शनम्-,महादोषमपि सकलगुणाधिष्ठानम्, कुपतिमपि कलत्रवल्लभम् अविरत-

प्रवृत्त-दानमप्यमदम्, अत्यन्तशुद्ध-स्वभावमपि कृष्णचरितम्, अकरमपि हस्तस्थित-सकल-भुवनतलं राजानमद्राक्षीत्।

आलोक्य च सा दूरस्थितैव प्रचलितरत्नवलयेन रक्त-कुवलयदल-कोमलेन पाणिना जर्जरितमुखभागां वेणुलतामादाय नरपतिप्रतिबोधनार्थं सकृत् सभाकुट्टिममाजघान; येन सकलमेव तद् राजकम् एकपदे वनकरियूथमिव तालशब्देन तेन वेणुलताध्वनिना युगपदावलितवदनमव- निपालमुखादाकृष्य चक्षुस्तदभिमुखमासीत्।

अवनिपतिस्तु 'दूरादालोकय' इत्यभिधाय प्रतीहार्य्या निर्दिश्यमानां तां वयःपरिणामशुभ्र-शिरसा रक्तन-राजीवनेत्रापाङ्गेनानवरत-कृत-व्यायामतया यौवनापगमेऽप्यशिथिलशरीरसन्धिना सत्यपि मातङ्गत्वे नातिनृशंशाकृतिना अनुगृहीतार्य्यवेशेन शुभ्र-वाससा-पुरुषेणाधिष्ठितपुरोभागाम्,

चाण्डालकन्यकावर्णनम्

आकुलाकुल-काकपक्षधारिणा कनक-शलाका-निर्म्मितमप्यन्तर्गत-शुकप्रभाश्यामायमानं मरकतमयमिव पञ्जरमुद्वहता चण्डालदारकेणानुगम्यमानाम् असुर-गृहीतामृतापहरण-कृतकपट-पटु विलासिनीवेशस्य श्यामतया भगवतो हरेरिवानुकुर्वतीम्, सञ्चारिणीमिवेन्द्रनीलमणिपुत्रिकाम्, आगुल्फावलम्बिना नीलकञ्चुकेनाच्छन्नशरीरम्, उपरि रक्तांशुक-विरचितावगुण्ठनां नीलोत्पलस्थलीमिव निपतितसन्ध्यातपाम्, एक-कर्णावसक्त-दन्तपत्रप्रभाधवलितकपोल-मण्डलाम् उद्यदिन्दुकिरणच्छुरित- मुखीमिव विभावरीम्, आकपिल-गोरोचना-रचित-तिलक-तृतीय-लोचनाम् ईशानुचरितकिरातवेशामिव भवानीम्। उरःस्थल-निवास-संक्रान्त-नारायण-देहप्रभा-श्यामलितामिवश्रियम्, कुपित-हर-हुताशन- दह्यमान-मदन-मलिनीकृतामिव रतिम्, उन्मद-हलिहलाकर्षण-भय-पलायितामिव कालिन्दीम्, अतिबहल-पिण्डालक्तक-रस-राग-पल्लवितपादपङ्कजाम्, अचिर-मृदित-महिषासुर-रुधिर-रक्त- चरणामिव कात्यायनीम्, अलोहिताङ्गुलि-प्रभा-पाटलित-नख-मयूखाम्, अतिकठिन- मणिकुट्टिम- स्पर्शमसहमानां क्षितितले पल्लवभङ्गानिव निधाय सञ्चरन्तीम्, आपिञ्जरेणोत्सर्पिणां नुपुरमणीनां प्रभाजालेन रंजितशरीरतया पावकेनेव भगवता रूपैक-पक्षपातिना प्रजापतिमप्रमाणीकुर्वता जातिसंशोधनार्थमालिङ्गितदेहाम्, अनङ्ग-वारण-शिरो-नक्षत्रमालायमानेन रोमराजि-लतालवालकेन मेखलादाम्ना परिगतजघनस्थलाम्, अतिस्थूल-मुक्ताफल-घटितम् शुचिना हारेण गङ्गास्रोतसेव कालिन्दीशङ्कया कृतकण्ठग्रहाम्, शरदमिव विकसित-पुण्डरीक-लोचनाम्, प्रावृषमिव घनकेशजालाम्, मलयमेखलामिव चन्दनपल्लवावतंसाम्, नक्षत्रमालामिव चित्रश्रवणा-भरण-भूषिताम्, श्रियमिव हस्तस्थित-कमलशोभाम्, मूर्च्छामिव मनोहारिणीम्, अरण्यभूमिमिव अक्षत-रूपसम्पन्नाम्, दिव्ययोषितामिवाकुलीनाम्, निद्रामिव लोचनग्राहिणीम् , अरण्यकमलिनीमिव मातङ्गकुलदूषिताम्, आमूर्त्तामिव स्पर्शवर्जिताम्, आलेख्यगतामिव दर्शनमात्रफलाम्, मधुमास-कुसुम-समृद्धिमिव अजातिम्, अनङ्ग-कुसुम-चापलेखामिव मुष्टिग्राह्यमध्याम्, यक्षाधिपलक्ष्मीमिवालकोद्भासिनीम्,

अचिरोपरूढयौवनाम्, अतिशयरूपाकृतिम्, अनिमिष-लोचनो ददर्श। दृष्ट्वा च तां समुपजातविस्मयस्याभून्मनसि महीपतेः-'अहो! विधातुरस्थाने रूप-निष्पादनप्रयत्नः। तथाहि, यदि नामेयमात्मरूपोपहसिताशेषरूपसम्पदुत्पादिता, किमर्थमपगत-स्पर्श-सम्भोग-सुखे कृतं कुले जन्म।

शुकप्रशंसा

मन्ये च 'मातङ्ग-जाति-स्पर्श-दोष-भयादस्पृशतेयमुत्पादिता प्रजापतिना, अन्यथा कथमियमाक्लिष्टता लावण्यस्य। नहि करतल-स्पर्श-क्लेशितानामवयवानामीदृशी भवति कान्तिः।

सर्वथा धिग्विधातारम् असदृशसंयोगकारिणम् अतिमनोहराकृतिरपि क्रूरजातितया येनेयमसुरश्रीरिव सतत-निन्दिता-सुरता रमणीयाऽप्युद्वेजयति'इति।

एवमादि चिन्तयन्तमेव राजानमीषदवगलित-कर्णपल्लवावतंसा प्रगल्भवनितेव कन्यका प्रणनाम।

कृतप्रणामायाञ्च तस्यां मणिकुट्टिमोपविष्टायाम्, स पुरुषस्तं विहङ्गममादाय पञ्जरगतमेव किञ्चिदुपसृत्य राज्ञे न्यवेदयदब्रवीच्च-

'देव! विदितसकलशास्त्रार्थः, राजनीतिप्रयोगकुशलः, पुराणेतिहासकथालापनिपुणः, वेदिता गीतश्रुतीम्, काव्य-नाटकाख्यानक-प्रभृतीनामपरिमितानां सुभाषितानामध्येता स्वयञ्च कर्त्ता, परिहासालपपेशलः, वीणा-वेणु-मुरजप्रभृतीनां वाद्यविशेषाणामसमः श्रोता, नृत्यप्रयोगदर्शननिपुणः चित्रकर्म्मणि प्रवीणः, द्यूतव्यापारे प्रगल्भः, प्रणयकलह-कुपित-कामिनी-प्रसादनोपायचतुरः, गज-तुरग- पुरुष-स्त्री-लक्षणाभिज्ञः, सकलभूतल-रत्नभूतोऽयं वैशम्पायनो नाम शुकः। सर्वरत्नानाञ्च उदधिरिव देवो भाजनमिति कृत्वैनमादायास्मत्स्वामिदुहिता देवपादमूलमायाता, तदयमात्मीयः क्रियतामित्युक्त्वा नरपतेः पुरो निधाय पञ्जरमसावपससार।

अपसृते च तस्मिन् स विहङ्गराजो राजाभिमुखो भूत्वा समुन्नमय्य दक्षिणं चरणमतिस्पष्ट-वर्ण - स्वर-संस्कारया गिरा कृतजयशब्दो राजानमुद्दिश्यार्य्यामिमां पपाठ-

'स्तनयुगमश्रुस्नातं समीपतरवर्त्ति हृदयशोकाग्नेः।
चरति विमुक्ताहारं व्रतमिव भवतो रिपुस्त्रीणाम्।।'

राजा तु तां श्रुत्वा संजात-विस्मयः सहर्षमासन्नवर्त्तिनम् अतिमहार्घहेमासनोपविष्टम् अमरगुरु-मिवाशेषनीतिशास्त्रपारगम् अतिवयसमग्रजन्मानमखिलमन्त्रिमण्डलप्रधानममात्यं कुमारपालितनामा- नमब्रवीत्-

'श्रुता भवद्भिरस्य विहङ्गमस्य स्पष्टता वर्णोच्चारणे, स्वरे च मधुरता! प्रथमं तावदिदमेव महदाश्चर्य्यम्, यदयमसङ्कीर्णवर्णप्रविभागामभिव्यक्तमात्रानुस्वार-संस्कार-योगां विशेषयुक्ताम् अतिपरिस्फुटाक्षरां गिरमुदीरयति। तत्र पुनरपरम् अभिमतविषये तिरश्चोऽपि मनुजस्येव संस्कारवती बुद्धिपूर्वा

प्रवृत्तिः। तथाहि–अनेन समुत्क्षिप्तदक्षिणचरणेनोच्चार्य्य जयशब्दमियमार्य्या मामुद्दिश्य परिस्फुटांक्षरं गीता। प्रायेण हि पक्षिणः पशवश्च भयाहार–मैथुन–संज्ञामात्र–वेदिनो भवन्ति। इदन्तु महच्छित्रम्।'

इत्युक्तवति भूभुजि कुमारपालितः किञ्चितस्मितवदनो नृपमवादीत्–'देव ! किमत्र चित्रम्। एते हि शुकशारिकाप्रभृतयो विहङ्ग–विशेषा यथाश्रुतां वाचमुच्चारयन्तीत्यधिगतमेव देवेन। तत्राप्यन्यजन्मोपात्त–संस्कारानुबन्धेन वा पुरुषप्रयत्नेन वा संस्कारातिशय उपजायत इति नातिचित्रम्। अन्यच्च, एतेषामपि पुरा पुरुषाणामिवातिपरिस्फुटाक्षरा वागासीत्, अग्निशापात्त्वस्फुटालापता शुकानामुपजाता, करिणाञ्च जिह्वापरिवृत्तिः।'

इत्येवमुच्चारयत्येव तस्मिन्नशिशिरकिरणमम्बरतलस्य मध्यमारूढमावेदयन्, नाडिकाच्छेदप्रहतपटु–पटह–नादानुसारी मध्याह्न–शङ्खध्वनिरदतिष्ठत्। तमाकर्ण्य च समासन्नस्नानसमयो विसर्जित– राजलोकः क्षितिपतिरास्थानमण्डपादुत्तस्थौ।

अथ चलति महीपतावन्योन्यमतिरभस–सञ्चलन–चालिताङ्गद–पत्रभङ्ग–मकरकोटिपाटितानेक–पानाम्, आक्षेपदोलायमान–कण्ठदाम्नाम्, अंसस्थलोल्लसित–कुङ्कुम–पटवासधूलिपटल–पिंजरीकृत–दिशाम्, आलोल मालतीकुसुम–शेखरोत्पतदलिकदम्बकानाम्, अर्द्धावलम्बिभिः कर्णोत्पलैश्चुम्ब्यमान–गण्डस्थलानाम्, गमन–प्रणाम–लालसानाम्, अहमहमिकया वक्षःस्थलप्रेङ्खोलित–हारलतानाम्, उत्तिष्ठतामासीदतिमहान् सम्भ्रमो महीपतीनाम्।

इतश्चेतश्च निषतन्तीनां स्कन्धावसक्त–चामराणां चामरग्राहिणीनां कमलमधु–पान–मत्त–जरत्कलहंस–नाद–जर्जरितेन पदे पदे रणितमणीनां मणिनूपुराणां निनादेन, वारविलासिनीजस्य सञ्चरतो जघनस्थलास्फालनरसित–रत्नमालिकानां मेखलानां मनोहारिणा झङ्कारेण, नूपुररवाकृष्टानाञ्च धवलितास्थानमण्डप–सोपानफलकानां भवनदीर्घिकाकलहंसकानां कोलाहलेन, रशनारसितोऽत्सुकानाञ्च तारतर–विराविणामुल्लिख्यमान–कांस्य–केङ्कारदीर्घेण गृहसारसानां कूजितेन, सरभसप्रचलित–सामन्तशतचरणतलाभिहतस्य चास्थानमण्डपस्य निर्घोषगम्भीरेण कम्पयतेव वसुमतीं ध्वनिना, प्रतिहारिणाञ्च पुरः समुम्भ्रममुत्सारितजनानां दण्डिनां समारब्धहेलमुच्चैरुच्चारयतामालोकयतालोकयतेति तारतर–दीर्घेण भवनप्रासाद–कुंजेषूच्चरित–प्रतिशब्दतया दीर्घतरतामुपगतेनालोकशब्देन, राज्ञाञ्च ससम्भ्रमावर्जित–मौलि लोल–चूडामणीनां प्रणमताममल–मणिशलाकादन्तुराभिः किरीट–कोटिभिरुल्लिख्यमानस्य मणिकुट्टिमस्य निःस्वनेन, प्रणामपर्य्यस्तानामतिकठिनमणिकुट्टिमनिपतनरणरणायितानाञ्च मणिकर्णपूराणां निनादेन, मङ्गलपाठकानाञ्च पुरोयायिनां जयजीवेति मङ्गलमधुरवचनानुयातेन पठतां दिगन्तव्यापिना कलकलेन, प्रचलित–जनचरणशतसंक्षोभभयादपहाय कुसुमप्रकरमुत्पतताञ्च मधुलिहां हुङ्कृतेन, संक्षोभादतित्वरितपद–प्रवृत्तैरवनिपतिभिः केयूरकोटिताडितानां क्वणित–मुखर–रत्नदाम्नाञ्च मणिस्थम्भानां रणितेन सर्वतः क्षुभितमिव तदास्थानभवनमभवत्।

शूद्रकस्नानवर्णनम्

अथ विसर्जितराजलोको 'विश्रम्यता'मिति स्वयमेवाभिधाय तां चाण्डाल-कन्यकाम्, 'वैशम्पायनः प्रवेश्यतामभ्यन्तरम्' इति ताम्बूलकरङ्कवादिनीमादिश्य कतिपयाप्तराजपुत्रपरिवृतो नरपतिरभ्यन्तरं प्राविशत्।

अपनीताभरणश्च दिवसकर इव विगलितकिरणजालः चन्द्रतारकाशून्य इव गगनाभोगः समुपाहृत-समुचित-व्यायामोपकरणां व्यायामभूमिमयासीत्।

स तस्याञ्च समानवयोभिः सह राजपुत्रैः कृतमधुरव्यायामः, श्रमवशादुन्मिषन्तीभिः कपोलयोरीषदवलित-सिन्दुवार-कुसुम-मञ्जरी-विभ्रमाभिः, उरसि निर्दयश्रम-छिन्न-हारविगलित-मुक्ताफल-प्रकारानुकारिणीभिः ललाटपट्टकेऽष्टमी-चन्द्र-शकल-तलोल्लसदमृतबिन्दुविडम्बिनीभिः स्वेदजल-कणिकासन्ततिभिरलङ्क्रियमाणमूर्त्तिः इतस्ततः स्नानोपकरणसम्पादनसत्वरेण पुरःप्रधावता परिजनेन तत्कालं विरलजनेऽपि राजकुले समुत्सारणाधिकारमुचितमाचरद्भिः दण्डिभिरुपदिश्य-मानमार्गः, वितत-सितवितानाम्, अनेक-चारणगण-निबध्यमानमण्डलाम्, गन्धोदक- पूर्ण-कनकमय-द्रोणी-सनाथमध्याम्, उपस्थापित-स्फाटिकस्नानपीठाम्, एकान्तनिहितैरति-सुरभि-गन्ध-सलिलपूर्णैः परिमलावकृष्ट-मधुकर-कुलान्धकारितमुखैरातपभयान्नीलकर्पटावगुण्ठितमुखैरिव स्नानकलशैरुपशोभितां स्नानभूमिमगच्छत्।

अवतीर्णस्य च जलद्रोणीं वारविलासिनी-कर-मृदित-सुगन्धामलकलिप्तशिरसो राज्ञः समन्तात् समुपतस्थुरंशुक-निबद्ध-स्तनपरिकराः, दूरसमुत्सारित-वलय-बाहुलताः, समुत्क्षिप्तकर्णाभरणाः कर्णो-त्सङ्गोत्सारितालकाः, गृहीतजल-कलशाः स्नानार्थमभिषेकदेवता इव वारयोषितः।

ताभिश्च समुन्नत-कुचकुम्भ-मण्डलाभिर्वारिमध्यप्रविष्ट-करिणीभिरिव वनकरी परिवृतस्तत्क्षणं रराज राजा।

द्रोणीसलिलादुत्थय च स्नानपीठममलस्फटिक-धवलं वरुण इव राजहंसमारुरोह। ततस्ताः काश्चिन्मरकतमणि-कलश-प्रभाश्यामायमाना नलिन्य इव मूर्त्तिमत्यः पत्रपुटैः, काश्चिद्रजतकल- शहस्ता रजन्य इव पूर्णचन्द्रमण्डलिनिर्गतेन ज्योत्स्नाप्रवाहेण, काश्चित् कलसोत्क्षेप-श्रमस्वेदार्द्र- शरीरा जलदेवता इव स्फटिकैः कलसैस्तीर्थजलेन, काश्चिन्मलयसरित इव चन्दनरसमिश्रेण सलिलेन, काश्चिदुक्षिप्त-कलस-पार्श्व-विन्यस्त-हस्तपल्लवाः प्रकीर्य्यमाण नखःजालकाः प्रत्यङ्गुलि-विवर-विनिर्गत-जलधाराः सलिलयन्त्रदेवता इव, काश्चिज्जाड्यमपनेतुमाक्षिप्त-बालातपेनेव दिवसश्रिय इव कनककलसहस्ताः कुङ्कुमजलेन वाराङ्गनाः यथायथं राजनमभिषिषिचुः।

अनन्तरमुदपादि च स्फोटयन्निव श्रुतिपथमनेक-प्रहत-पटु-पटह-झल्लरी-मृदङ्ग-वेणुवीणा- गीत-निनादानुगम्यमानो वन्दिवृन्द- कोलाहलाकुलो भुवन-विवरव्यापी स्नानशङ्खानामापूर्य्यमाणानामतिमुखरो ध्वनिः।

एवञ्च क्रमेण निर्वर्त्तिताभिषेको विषधरनिर्म्मोक-परिलघुनी धवले परिधाय धौतवाससी शरदम्बरैकदेश इव जलक्षालन-निर्मलतनुः अतिधवल-जलधर-च्छेद-शुचिना दुकूलपटपल्लवेन तुहिनगिरिरिव गगनसरित्स्रोतसा कृत-शिरोवेष्टनः सम्पादित-पितृजलक्रियो मन्त्रपूतेन तोयाञ्जलिना दिवसकरमभिप्रणम्य देवगृहमगमत्।

उपरचित-पशुपतिपूजश्च निष्क्रम्य देवगृहाजन्निर्वर्तिताग्निकार्यो विलेपनभूमौ झङ्कारिभिरलि-कदम्बकैरनुबध्यमानपरिमलेन मृगमद-कर्पूर-कुङ्कुमवास-सुरभिणा चन्दनेनानुलिप्तसर्वाङ्गो विरचितामोदि-मालतीकुसुमशेखरः कृतवस्त्रपरिवर्तः। रत्नकर्णपूरमात्राभरणः समुचितभोजनैः सह भूपतिभिराहारमभिमत-रसास्वाद-जातप्रीतिरवनिपो निर्वर्त्तयामास।

परिपीतधूमवर्त्तिरुस्पृश्य च गृहीतताम्बूलस्तस्मात् प्रमृष्ट-कुट्टिम-प्रदेशादुत्थाय नातिदूरवर्त्तिन्या ससम्भ्रम-प्रधावितया प्रतीहार्य्या प्रसारितं बाहुम् अवलम्ब्यानवरतवेत्रलताग्रहण- प्रसङ्गादतिजरठ-किसलयानुकारि-करतलं करेण अभ्यन्तरसञ्चारसमुचितेन परिजनेनानुगम्यमानः, धवलांशुक-परिगतपर्य्यन्ततया स्फटिक- मणिमय-भित्त-बद्धमिवोपलक्ष्यमाणम्, अविरलविप्रकीर्णेन विमल-मणिकुट्टिम-गगनतलतारागणेनेव कुसुमोपहारेण निरन्तरनिचितम्, उत्कीर्णशालभञ्जिकानिवहेन सन्निहितगृहदेवतेनेव गन्धसलिल-क्षालितेन कलधौतमयेन स्तम्भसञ्चयेन विराजमानम्,

अतिबहलागुरु-धूप-परिमलम्, अखिलविगलित-जलनिवह-धवल-जलधर-शकलानुकारिणा कुसुमामोदवासित-प्रच्छदपटेन, पट्टोपधानाध्यासितशिरोधाम्ना मणिमय-प्रतिपादुकाप्रतिष्ठितपादेन पार्श्वस्थ-रत्नपादपीठेन तुहिनगिरिशिलातल-सदृशेन शयनेन सनाथीकृतवैदिकं भुक्त्वास्थानमण्डपमयासीत्।

तत्र च शयने निषण्णः क्षितितलोपविष्टया शनैःरुत्सङ्ग-निहितासिलतया खड्गवाहिन्या नव-नलिन-दल-कोमलेन करसम्पुटेन संवाह्यमानचरणस्तत्कालोचितदर्शनैरवनिपतिभिरमात्यैर्मित्रैश्च सह तास्ताः कथाः कुर्वन् मुहुर्त्तमिवासाञ्चक्रे।

ततो नातिदूरवर्त्तिनीम् 'अन्तःपुराद्वैशम्पायनमादायागच्छ' इति समुपजाततद्वृत्तान्तप्रश्न- कुतूहलो राजा प्रतीहारीमादिदेश।

सा क्षितितल-निहित जानु-करतला 'यथाज्ञापयति दैवः' इति शिरसि कृत्वाज्ञां यथादिष्टमकरोत्।

अथ मुहूर्त्तादिव वैशम्पायनः प्रतीहार्य्या गृहीतपञ्जरः कनकवेत्रलतावलम्बिता किञ्चिदवनतपूर्वकायेन सितकञ्चुकाच्छन्नवपुषा जराधवलितमौलिना गद्गदस्वरेण मन्दमन्दसञ्चारिणा विहङ्गजातिप्रीत्या जरत्कलहंसेनेव कञ्चुकिनानुगम्यमानो राजान्तिकमाजगाम।

क्षितितल-निहितकरतलस्तु कञ्चुकी राजानं व्यज्ञापयत् -देव! देव्यो विज्ञापयन्ति, देवादेशादेव वैशम्पायनः स्नातः कृताहारश्च देवपादमूलं प्रतीहार्य्या नीत' इत्यभिधाय गते च तस्मिन् राजा वैशम्पायनमपृच्छत्-'कच्चित् अभिमतमास्वादितमभ्यन्तरे भवता किञ्चिदशनजातम्?'इति।

स प्रत्युवाच–'देव किंवा नास्वादितम्?, आमत्त–कोकिल–लोचनच्छविर्नीलपाटलः कषायमधुरः प्रकाममापीतो जम्बूफलरसः हरि–नखरभिन्न–मत्तमातङ्गकुम्भ–मुक्त–रक्तार्द्रमुक्ताफलत्वींषि खण्डितानि दाडिम–बीजानि, नलिनीदल–हरिन्ति द्राक्षाफल–स्वादूनि च दलितानि स्वेच्छया प्राचीनामल– कीफलानि। किं वा प्रलपितेन बहुना, सर्वमेव देवीस्त्वियं करतलोपनीयमानममृतायते' इति।

एवंवादिनो वचनमाक्षिप्य नरपतिरब्रवीत्–आस्तां तावत् सर्वमेवदम्, अपनयतु नः कुतूहलम्, आवेदयतु भवानादितः प्रभृति कार्त्येनात्मनः, जन्म कस्मिन् देशे? भवान् कथं जातः? केन वा नाम कृतम्? का ते माता? कस्ते पिता?कथं वेदानामागमः? कथं शास्त्राणां परिचयः? कुतः कलाः समासादिताः? कि हेतुकं जन्मातरानुस्मरणम्? उत वरप्रदानम्, अथवा विहगवेश–धारी कश्चिच्छन्नो निवससि? क्व पूर्वमुषितम्? कियद्वा वयः? कथं वा पञ्जरबन्धनम्? कथं चण्डाल–हस्तगमनम्? इह वा कथमागमनम्?

वैशम्पायनस्तु स्वयमुपजातकुतूहलेन सबहुमानमवनिपतिना पृष्ठो मुहूर्त्तमिव ध्यात्वा सादरमब्रवीत्–देव! महतीयं कथा, यदि कौतुक माकर्ण्यताम्–

विन्ध्याटवी वर्णनम्

अस्ति पूर्वापर–जलनिधिःवेलावनलग्ना मध्यदेशालङ्कारभूता मेखलेन भुवः, वन–करिकुल–मदजल–सेक–संवर्द्धितैरतिविकच–धवल–कुसुमनिकरमत्युच्चतया तारा –गणमिव शिखरदेशलग्न– मुद्वहद्भिः पादपैरुपशोभिता, मदकल–कुररकुल–दश्यमान–मरिचपल्लया, करि–कलभ–करमृदित–तमालकिसलयामोदीनी मधुमदोपरक्त–केरली–कपोल–कोमलच्छविना सञ्चरद्वनदेवता–चरणालक्तक–रस–रञ्जितेनेव पल्लवचयेन संछादिता, शुककुल–दलितदाडिमीफल–द्रवार्द्रीकृत– तलैरतिचपल– कपिकुल–कम्पित–कम्पिल्ल–च्युतपल्लव–फलशकलैः अनवरत–निपत– कुसुमरेणुपांशुलैः पथिक–जन– रचित–लवङ्ग–पल्लव–संस्तरैः अतिकठोर– नारिकेल–केतकी–करीर– बकुल–परिगतप्रान्तैः ताम्बूली– लतावनद्ध–पूग–खण्डमण्डितैर्वनलक्ष्मी–वासभवनैरिव विराजिता लतामण्डपैः, उन्मद– मातङ्ग– कपोलस्थल–गलित–सलिल–सिक्तेनेव निरन्तरमे–लालतावनेन मदगन्धिनान्धजारिता, नख–मुख– लग्नेभकुम्भ–मुक्ताफल–लुब्धः शबरसेनापतिभिरभिहन्यमानकेशरिशता प्रेताधिपनगरीव सदासन्निहित– मृत्यु–भूषणा महिषाधिष्ठिता च, समरोद्यतपताकिनीव बाणासनारोपितशिलीमुखा विमुक्त–सिंहनादा च, कात्यायनीव प्रचलितखड्गभीषणा रक्तचन्दनालङ्कृता च, कर्णीसुतकथेव सन्निहित–विपुलाचला शशोपगता च कल्पान्तप्रदोषसन्ध्येव प्रनृत्यन्नीलकण्ठा च, अमृतमथनवेलेव श्रीद्रुमोपशोभिता वारुणी–परिगता च, प्रावृडिव घनश्यामला अनेकशतहृदालङ्कृता च, चन्द्रमूर्त्तिरिव सततमृक्षसार्थानुगता हरिणाध्यासिता च, राज्यस्थितिरिव चमरमृग–बालव्यजनोपशोभिता समदगजघटा–परिपालिता च, गिरितनयेव स्थाणुसङ्गता मृगपतिसेविता, च जानकीव प्रसूतकुशलवा निशाचरपरिगृहीता च, कामिनीव चन्दन–मृगमदपरिमलवाहिनी रुचिरागुरु–तिलकभूषिता च, सोत्कण्ठेन विविधपल्लवानिलवीजिता समदना च, बालग्रीवेव व्याघ्रनखपङ्क्तिमण्डिता गण्डकाभरणा

च, पानभूमिरिव प्रकटित–मधुकोशक –शता प्रकीर्णविविधाकुसुमा च, क्वचित् प्रलयवेलेव महावराह–दंष्ट्रा–समुत्खात–धरणिमण्डला, क्वचिद्दशमुखनगरीव चटुलवानरवृन्द– भज्यमान– तुङ्गशालाकुला, क्वचिदचिरनिर्वृत्त–विवाहभूमिरिव हरित–कुश–समित–कुसुम–शमी–पलाशशोभिता, क्वचिदुन्मत्त–मृगपति–नाद–भीतेव कण्टकिता, क्वचिन्मत्तेव कोकिलकुल–कलप्रलापिनी, क्वचिदुन्मत्तेव वायुवेग–कृत–तालशब्दा, क्वचिद्विधवेव उन्मुक्ततालपत्रा, क्वचित् समरभूमिरिव शर–शव–निचिता, क्वचिदमरपति–तनुरिव नेत्रसहस्र–सङ्कुला–क्वचिन्नारायणमूर्त्तिरिव तमालनीला, क्वचित्, पार्थरथ– पताकेव वानराक्रान्ता, क्वचिदवनिपति–द्वारभूमिरिव वेत्रलताशतदुष्प्रवेशा, क्विचिद्विराटनगरीव कीचकशतावृता, क्वचिदम्बरश्रीरिव व्याधानुगम्यमान–तरल–तारक–मृगा, क्वचिदगृहीतव्रतेव दर्भ–चीर– जटा–बल्कल– धारिणी, अपरिमित–बहलपत्रसञ्जयाऽपि सप्तपर्णभूषिता, क्रूरसत्त्वाऽपि मुनिजनसेविता, पुष्पवत्यपि पवित्रा विन्ध्याटवी नाम्।

अगस्त्याश्रम वर्णनम्

तस्याञ्च दण्डकारण्यान्तःपति सकलभुवनविख्यातम् उत्पत्तिक्षेत्रमिव भगवतो धर्म्मस्य, सुरपति–प्रार्थना–पीत–सकल–सागर–सलिलस्य मेरु–मत्सरादम्बरतल–प्रसारित–शिरःसहस्रेण दिवसकर–रथागमन –पथमपनेतुमभ्युद्यतेन अवगणित सकलसुर–वचसा विन्ध्यगिरिणाप्यनुल्लङ्घिताज्ञस्य जठरानल– जीर्ण–वातापिदानवस्य सुरासुर–मुकुट–मकरपत्र–कोटि–चुम्बितचरण–रजसो दक्षिणाशा––वधू–मुख– विशेषकस्य, सुरलोकादेकहुङ्कारनिपातित–नहुष प्रकटप्रभावस्य भगवतो महामुनेरगस्त्यस्य, भार्य्यया लोपासमुद्रया स्वयमुपरचितालबालकैः करपुटसलिलसेक–संबर्द्धितैः सुतनिर्विशेषैरुपशोभितं पादपैः, तत्पुत्रेण च गृहीतव्रतेनाषाढिना पवित्र भस्म–विरचित–त्रिपुण्ड्रकाभरणेन कुश–चीवर– –वाससा मौञ्ज–मेखलाकलितमध्येन गृहीत–हरिपर्णपुटेन प्रत्युजमटता भिक्षां दृढदस्युनाम्ना पवित्रीकृतम्, अतिप्रभूतेध्माहरणाच्च यस्येध्मवाह इति पिता द्वितीयं नाम चकार, दिशि दिशि शुक्रहरितैश्च कदलीवनैः श्यामलीकृत–परिसरं सरिता च कलसयोनि–परिपीत–सागरमार्गानुगतयेव बद्धवेणिकया गोदावर्य्या परिगतमाश्रमपदमासीत्।यत्र च दशरथवचनमनुपालयन्नुत्सृष्टराज्यो –दशवदन–लक्ष्मी–विभ्रमविरामो रामो महामुनिमगस्त्यमनुचरन् सह सीतया लक्ष्मणोपरचित–रुचिर–पर्णशालः–पञ्चवट्यां कञ्चित कालं सुखमुवास। चिरशून्येऽद्यापि यत्र शाखानिलीनि–निभृत–पाण्ड–कपोतपङ्क्तयो लग्नतापसाग्निहोत्र–धूमराजय इव लक्ष्यन्ते तरवः। बलिकर्म्म–कुसुमान्युद्धरन्त्याः सीतायाः करतलादिव सङ्क्रान्तो रागः स्फुरितलताकिसलयेषु। यत्र च पीतोद्गीर्णजलनिधि–जलमिव मुनिना निखिलमाश्रमोपान्तवर्त्तिषु विभक्तं महाह्रदेषु। यत्र च दशरथ–सुत–निशितशर–निकर–निपात– निहत–रजनीचर–बल–बहल–रुधिर–सिक्त–मूलमद्यापि तद्रागाविद्ध–निर्गतपलाशमिवाभाति नव–किसलयमरण्यम्। अधुनापि यत्र जलधरसमये गम्भीरमभिनवजलधर–निवह–निनादमाकर्ण्य भगवतो रामस्य त्रिभुवन–विवर–व्यापिनश्चापघोषस्य स्मरन्तो न गृह्णन्ति शष–कवलमजस्रमश्रुजल–लुलित– दृष्टयो वीक्ष्य शून्या दश दिशो जराजर्ज्जरित–विषाणकयो जानकीसंवर्द्धिता जीर्णमृगाः। यस्मिन्ननवरत–मृगया–निहत–शेष–वनहरिण–प्रोत्साहित इव कृतसीताविप्रलम्भः कनकमृगो राघवमतिदूरं जहार। यत्र

मैथिलीवियोगदुःखदुःखदुःखितौ दशवदन विनाश–पिशुनौ चन्द्रसूर्य्याविव कबन्धग्रस्तौ समं रामलक्ष्मणौ त्रिभुवनमयं महच्चक्रतुः। अत्यायतश्च यस्मिर दशरथसुत–शर–निपातितो योजनबाहोर्बाहुरगस्त्य–प्रसादनागतनहुषाजगर–कायशङ्कां चकार ऋषिगणस्य। जनकतनया भर्त्रा विरहविनोदनार्थमुटजाभ्यन्तरलिखिता यत्र रामनिवास–दर्शनोत्सुका पुनरिव धरणीतलादुल्लसन्तीव वनचरैरद्याप्यालोक्यते ।

पम्पासरोवर्णनम्

तस्य चैवंविधस्य सम्प्रत्यपि प्रकटोपलक्ष्यमाण–पूर्ववृत्तान्तस्यागस्त्याश्रमस्य नातिदूरे जलनिधि–पान–कुपित–वरुणोत्साहितेन आगस्त्यमत्सरात्तदाश्रमसमीपवर्त्त्यपर इव वेधसा महाजलनिधिरुत्पादिनः प्रलयकाय–विघटिताष्ट–दिग्भाग–सन्निबन्धं सलिलपूरितम्, अनवरत– मज्जदुन्मद–शबरकामिनी–कुचकलस–लुलित–जलम्, उत्फुल्ल–कुमुद–कुवलय–कह्लारम्, उन्निद्रारविन्दमधुबिन्दु–बद्धचन्द्रकम्, अलिकुल–पटलान्धकारितसौगन्धिकम्, सारसित–समद–सारसम्, अम्बुरुह–मधुपान–मत्त–कलहंसकामिनी–कृत–कोलाहलम्, अनेक–जलचर–पतङ्गशत –सञ्चलनचलित –वाचाल–वीचिमालम्, अनिलोल्लासित –कल्लोल–शिशिर–शीकरारब्ध–दुर्दिनम्, अशङ्कितावतीर्णाभिरम्भ –क्रीडारागिणीभिः स्नानसमये वनदेवत्ताभिः केशपाशकुसुमैः सुरभीकृतम्, एकदेशावतीर्णमुनिजनापूर्य्यमाण–कमण्डलु–कल–जलध्वनि मनोहरम्, उन्मिषदुत्पलवन –मध्यचारिभिः सवर्णतया रसितानुमेयैः कादम्ब–कदम्बकैरासेवितम्, अभिषेकावतीर्ण–पुलिन्दराज–सुन्दरी–कुच– चन्दनधूलि–धवलितं–तरङ्गम्, उपान्त–जात –केतकीः रजः पटल–बद्ध–कूल– पुलिनम्, आसन्नाश्रमागत–तापसक्षालितार्द्र–वल्कल–कषाय–पाटल–तटजलम्, उपतट–विटपि–पल्लवानिल– वीजितम्, अविरल–तमाल–वीथिकान्धकारिताभिः वालिनिर्वासितेन संचरता प्रतिदिनमृष्यमूकवासिना सुग्रीवेणावलुप्त–फल–लघु–लताभिः, उदवासितापसानां देवताच्र्चनोपयुक्त– कुसुमाभिः उत्पतज्जलचर–पतङ्ग –पक्षपुट–विगलित–जलबिन्दुसेक– सुकुमार– किसलयाभिः लतामण्डप–तल–शिखण्डि–मण्डलारब्ध– ताण्डवाभिः अनेककुसुम–परिमल–वाहिनीभिर्वनदेवताभिः स्वश्वास–वासिताभिरिव वनराजिभिरुपरुद्धतीरम्, अपरसागरशङ्किभिः सलिलमादातुमतीर्णैर्जलधरैरिव वहल–पङ्क–मलिनैर्वनकरिभिरनवरतापीयमानसलिलम्, अगाधमनन्तमप्रतिमम् अपां निधानं पम्पाभिधानं पद्मसरः।

यत्र च विकच–कुवलय–प्रभा–श्यामायमान–पक्षपुटान्यद्यापि मूत्तिमद्रामशापग्रस्तानीव मध्यचारिणामालोक्यन्ते चक्रवाकनाम्नां पक्षिणां मिथुनानि।

शाल्मलीवृक्षवर्णनम्

तस्यैव पद्मसरसः पश्चिमे तीरे राघव–शर–प्रहार–जर्जरित–जीर्ण–तालतरु–षण्डस्य च समीपे

दिग्गजकरदण्डानुकारिणाठ जरदजगरेण सततमावेष्टितमूलतया बद्धमहालवाल इव तुङ्गस्कन्धाव–लम्बिभिरनिलवेल्लितैरहिनिर्म्मोकैर्धृतोत्तरीयइव दिक्चक्रवालपरिमाणमिवतुङ्गस्कन्धा–

वलम्बिभिरनिलवेल्लितैरहिनिर्म्मोकैर्धृतोत्तरीय इव दिक्चक्रावल-परिमाणमिव गृह्णता भुवनान्तरालविप्रकीर्णेन शाखासंचयेन प्रलयकाल-ताण्डव प्रसारित-भुजसहस्रमुडुपतिशेखरमिव विडम्बयितुमुद्यतः पुराणतया पतनभयादिव वायुस्कन्धलग्नः निखिलशरीर-व्यापिनीभिरतिदूरोन्नताभिर्जीर्णतया शिराभिरिव परिगतो व्रततिभिः, जरा-तिलकबिन्दुभिरिव कण्टकैराचिततनुः इतस्ततः परिपीतसागरसलिलै-र्गगनागतैः, पत्ररथैरिव शाखान्तरेषु निलीयमानैः क्षणमम्बुभारालसैरार्द्रीकृत-पल्लवैर्जलधरपटलैरप्यदृष्टशिरः, तुङ्गतया नन्दनवनश्रियमिवावलोकयितुमभ्युद्यतः, स्वसमीपवर्त्तिनामुपरि संचरतां गगनतल गमन-खेदायासितानां रविरथतुरङ्गमाणां सृक्कपरिस्रुतैः फेनपटलैः सन्देहित-तूलराशिभिर्धवलीकृतशिखरशाखः, वनगज-कपोलकण्डूयन-लग्नमद-निलीन-मत्तमधुकरमालेन लोहश्रृङ्खलाबन्धननिश्चलेनेव कल्पस्थायिना मूलेन समुपेतः, कोटराभ्यन्तरनिविष्टैः स्फुरद्भिः सजीव इव मधुकरपटलैः दुर्योधन इवोपलक्षित-शकुनिपक्षपातः, नलिननाभ इव वनमालोपगूढः नवजलधरव्यूह इव नभसि दर्शितोन्नतिः, अखिलभुवनतलावलोकनप्रासाद इव वनदेवतानाम्, अधिपतिरिव दण्डकारण्यस्य, नायक इव सर्ववनस्पतीनाम्, सखेव विन्ध्यस्य, शाखाबाहुभिरुपगुह्येव विन्ध्याटवीमवस्थितो महान् जीर्णः शाल्मलीवृक्षः ।

शुकजन्मवृत्तान्तः

तत्र च शाखाग्रेषुः कोटरोदरेषु पल्लवान्तरेषु स्कन्धसन्धिषु जीर्णवल्कलविवरेषु च महावकाशतया विश्रब्ध-विरचित-कुलायसहस्राणि दुरारोहतया विगलितविनाशभयानि नानादेशसमागतानि शुक-शकुनिकुलनानि प्रतिवसन्ति स्म। यैः परिणामविरलदलसंहतिरपि स वनस्पतिविरल-दल-निश्चय-श्यामल इवोपलक्ष्यते दिवानिशं निलीनैः।

ते च तस्मिन् वनस्पतावतिवाह्य निशामात्मनीडेषु प्रतिदिनमुत्थायोत्थायाहारान्वेषणाय नभसि विरचितपङ्क्तयो मदकल-बलभद्र-हलधर-हलमुखोत्क्षेप-विकीर्णबहुस्रोतसमम्बरतले कलिन्दकन्यामिव दर्शयन्तः,सुरगजोन्मूलित-विगलदाकाशगङ्गा-कमलिनीशङ्कामुपजनयन्तः,दिवस-कर-रथतुरग-प्रभानुलिप्तमिवगगनतलमुपपादयन्तः,सञ्चारिणीमिवमरकतस्थलींविडम्बयन्तः,शैवलफ्लवावलीमिवाम्बरसरसि प्रसारयन्तः, गगनविततैः पक्षपुटैः कदलीदलैरिव दिनकर-खर-कर-निकर-परिखेदितान्याशामुखानि

वीजयन्तः, वियति शष्पवीथीमिवारचयन्तः, सेन्द्रायुधमिवान्तरिक्षमादधाना विचरन्तिस्म शुकशकुनयः।

कृताहाराश्च पुनः प्रतिनिवृत्यात्मकुलावस्थितेभ्यः शावकेभ्यो विविधान् फलरसान् कलममञ्जरीविकारांश्च प्रहत-हरिण-रुधिरानुरक्त-शार्दूलनखकोटिपाटलेन चञ्चुपुटेन दत्त्वा अधरीकृतसर्वस्नेहेनासाधारणेन गुरुणऽपत्यप्रेम्णा तस्मिन्नेव क्रोडान्तर्निहिततनयाः क्षपाः क्षपयन्ति स्म।

एकस्मिंश्च जीर्णकोटरे जायया सह निवसतः पश्चिमे वयसि वर्त्तमानस्य कथमपि पितुरहमेवैको विधिवशात् सूनुरभवम्। अतिप्रबलया चाभिभूता ममैव जायमानस्य प्रसववेदनया जननी मे लोकान्तरमगमत्।

अभिमतजायाविनाशदुःखितोऽपि खलु तातः सुतस्नेहान्तनिगृह्य पट्प्रसरमपि शोकमेकाकी मत्संवर्धनपर एवाभवत्। अतिपरिणतवयाश्च कुशचीरानुकारिणीमल्पावशिष्ट-जीर्ण- पिच्छजाल-जर्जराम् अवस्रस्तांसदेशशिथिलाम् अपगतोत्पतनसंस्कारां पक्षसन्ततिम् उद्वहन्,उपारूढकम्पतया सन्तापकारिणीमङ्गलग्नां जरामिव विधुन्वन्, अकठोर-शेफालिकाकुसुम--पिञ्जरेण कलममञ्जरी-दलन-मसृणित-क्षीणोपान्तलेखेन स्फुटिताग्रकोटिना चञ्चुपुटेन, परनीडनिपतिताभ्यः शलिवल्लरीभ्यस्तण्डुलकणानादायादाय तरुमूलनिपतितानि च शुककुलावदलितानि फलशकलानि समाहृत्य परिभ्रमितुमशक्तो मह्यमदात्। प्रतिदिवसमात्मना च मदुपभुक्तशेषम् अकरोदशनम्।

प्रभातवर्णनम्

एकदा तु प्रभातसन्ध्यारागलोहिते गगने च कमलिनी-मधुरक्तः पक्षसम्पुटे वृद्धहंस इव मन्दाकिनीपुलिनादपर-जलनिधि-तटमवतरति चन्द्रमसि, परिणत-रङ्कु-रोम-पाण्डु नि व्रजति विशालतामाशाचक्रवाले गजरुधिर-रक्त-हरिसटा-लोहिनीभिः प्रतप्त-लाक्षिक -तन्तु-पाटलाभिरायामिनीभिः अशिशिरकिरणदीधितिभिः पद्मरागशलाकासम्मार्जनीभिरिव समुत्सार्य्यमाणे गगनकुट्टिमसुमप्रकरे तारागणे सन्ध्यामुपासिमुत्तरावलम्बिनि मानससरस्तीरमिवावतरति सप्तर्षिमण्डले, तटगत-विघटित-शुक्ति-सम्पुटविप्रकीर्णमरुणकर-प्रेरणाधोगलितमुडुगणमिव मुक्ताफलनिकरमुद्वहति धवलितपुलिनमुदन्वति पूर्वेतरे तुषारबिन्दुवर्षिणि विबुद्धशिखिकुले विजृम्भमाणकेशरिणि करिणी-कदम्बक-प्रबोद्यमान-समदकरिणि क्षपाजलजडकेशरं कुसुमनिकरमुदयगिरिशिखरस्थितं सवितारमिवोद्दिश्य पल्लवाञ्जलिभिः समुत्सृजति कानने-रासभ-रोम-धूसरासु वनदेवताप्रासादानां तरूणां शिखरेषु पारावतमालायमानासु धर्म्मपताकास्विव समुन्मिषन्तीषु तपोवनाग्निहोत्रधूमलेखासु, अवश्यायशीकरिणि लुलितकमलवने रति खिन्न-शबरसीमन्तिनी-स्वेदजलकणापहारिणि वनमहिष-रोमन्थफेनबिन्दुवाहिनिचलितपल्लव-लतालास्योपदेश-व्यसनिनिविघटमान-कमलखण्ड-मधुशीकरासारवर्षिणि कुसुमामोदतर्पितालिजाले निशावसानजातजडिम्नि मन्द-मन्दसञ्चारिणि प्रवाति प्रभातिके मातरिश्वनि, कमलवनप्रबोधमङ्गलपाठकानाम् इभगण्डडिण्डिमानां मधुलिहां कुमुदोदरेषु विघटमान -दलपुट -निरुद्धपक्षसंहतीनामुच्चरत्सु, प्रभातशिशिरमरुताहतमुत्तप्तजतुरसाश्लिष्टं पक्ष्ममालमिव सशेषनिद्राजिह्मिततारं चक्षुरुन्मीलयत्सु शनैः शनैरूषशय्या-क्रोडरोमराजिषु वनमृगेषु, इतस्ततः, सञ्चरत्सु वनचरेषु, विजृम्भमाणे श्रोत्रहारिणि पम्पासरः कलहंसकोलाहले समुल्लसति नर्त्तितशिखण्डिमण्डले मनोहरे वनगजकर्णतालशब्दे, क्रमेण च गगनतलमवरतो दिवसकरवारणस्यावचूडचामरकलाप इवोपलक्ष्यमाणे मञ्जिष्ठारागलोहिते किरणजाले, शनैःशनैरुदिते भगवति सवितरि, पम्पासरःपर्य्यन्त-तरु-शिखर-सञ्चारिणि अध्यासित-गिरिशिखरे दिवसकरजन्मनि हततारे पुनरिव कपीश्वरे वनमभिपतति बालातपे, स्पष्टे जाते प्रत्यूषसि, नचिरादिव दिवसाष्टमभागभाजि स्पष्टभासि भास्वति भूते, प्रयातेषु यथाभिमतानि दिगन्तराणि शुककुलेषु, कुलाय निलीननिभृत-शुक-शावकसनाथेऽपि निःशब्दतया शून्य इव तस्मिन् वनस्पतौ, स्वनीडावस्थित एव ताते, मयि च शैशवादसञ्जातबले समुद्भिद्यमानपक्षपुटे पितुः-समीपवर्त्तिनी कोटरगते, सहसैव तस्मिन्

महावने संत्रासितसकलवनचरः सरभसमुत्पतत्पतत्रिपक्षपुटसन्ततः भीत-करिपोत-चीत्कारपीवरः प्रचलित-मत्तालिकुलक्वणितमांसलःपरिभ्रमदुद्धोणवन-वराह--रवघर्घरा:गिरिगुहा-सुप्त-प्रबुद्ध-सिंहनादोपबृंहितः, कम्पयन्निव तरून् भगीरथावतार्य्यमाण -गङ्गाप्रवाहकलकल-बहलो भीतवनदेवताकर्णितो मृगयाकोलाहलध्वनिरुदचरत्।

मृगयावर्णनम्

आकर्ण्य च तमहमश्रुतपूर्वमुपजातवेपथुरर्भकतया जर्ज्जरित-कर्णविवरो भयविह्वलः समीपवर्त्तिनः पितुः प्रतीकारबुद्ध्या जराशिथिलपक्षपुटान्तरमविशम् ।

अनन्तरञ्च 'सरभसमितो गजयूथपति-ललत-कमलिनी-परिमलः; इत: क्रोडकुल दश्यमान-भद्रमुस्तरसामोद:,इत:कटिकलभ-भज्यमान-सल्लकी-कषायगन्ध:,इतो निपतित-शुष्कपत्रमर्म्मरध्वनिः, इतो वनमहिष-विषाण-कोटिकुलिश-भिद्यमान-वल्मीकधूलिः, इतो मृगकदम्बकम्, इतो वनगजकुलम्, इतो वनवराहयूथम्, इतो वनमहिषवृन्दम्, इतः शिखण्डिमण्डल-विरुतम्, इतः कपिञ्जल-कुल-कल-कूजितम्, इतः कुररकुल-क्वणितम्, इतो मृगपतिनखभिद्यमान-कुम्भ-कुञ्जर-रसितम्, इयमार्द्र-पङ्कमालिना वराहपद्धतिः, इयमभिनवं-शष्पकवल-रस-श्यमला हरिम-रोमन्थ-फेन-संहतिः,इयमुन्मद-गन्धगजगण्ड-कण्डूयन-परिमल निलीन-मधुकर-विरुतिः, एषा निपतितरुधिरबिन्दुसिक्त-शुष्कपत्र-पाटला रुरुपदवी;एतद्द्विरद-चरण-मृदित-विटप-पल्लपटलम्, एतत् खड्गिकुलक्रीडितम्, एष प्रत्यग्रप्रसूतविलिखितविकट-पत्रलेखो रुधिरपाटलः करिमौक्तिकदन्तुरो मृगपतिमार्गः, एषा प्रत्यग्रप्रसूतवनमृगीगर्भ-रुधिर-लोहिनी-भूमिः, इयमटवी वेणिकानुसारिणी पक्षचरस्य यूथपतेर्मदजलमलिना, सञ्चार-वीथी-चमरीपङ्क्तिरियमनुगम्यताम्, उच्छुष्कमृग-करीष-पांसुला त्वरिततरमध्यास्यतामियं वनस्थली,तरुशिखरमारुह्यताम्, आलोक्यतां दिगियम्, आकर्ण्यतामयं शब्दः, गृह्यतां धनुः, अवहितैः स्थीयताम्, विमुच्यन्तां श्वानः' इत्यन्योन्यमभिदधतो मृगयासक्तस्य महतो जनसमूहस्य तरुगहनान्तरितविग्रहस्य क्षोभितकाननं कोलाहलमश्रृणवम्।

शबरमृगयावर्णनम्

अथ नातिचिरादेवानुलेपनार्द्र-मृदङ्गध्वनिधीरेण गिरिविवर-विजृम्भित-प्रतिनाद-गम्भीरेण, शबर-शर-ताडितानां केशरिणां निनादेन, संत्रस्त-यूथ-मुक्तानामेकाकिनाञ्च सञ्चरतामनवरत-करास्फोटमिश्रेण जलधर-रसितानुकारिणा गजयूथपतीनां कण्ठगर्जितेन, सरभस-सारमेय-विलुप्यमानावयवानामालोल-कातर-तरलतर-तारकाणामेणकानाञ्च करुण-कूजितेन, निहत-यूथपतीनां वियोगिनामनुगत-कलभानाञ्च स्थित्वा समाकर्ण्य कलकलमुत्कर्णपल्लवानामितस्ततः परिभ्रमन्तीनां प्रत्यय-पतिविनाशशोकदीर्घेण करिणीनां चीत्कृतेन, कतिपय-दिवस-प्रसूतानाञ्च खड्गिधेनुकानां त्रास-परिभ्रष्ट-पोतकान्वेषिणीनामुन्मुक्तकण्ठमारसन्तीनामाक्रन्दितेन,

तरुशिखरसमुत्पतितानामाकुलाकुलचारिणाञ्च पत्ररथानां कोलाहलेन, रूपानुसार-प्रधाविताना‌ञ्च मृगयूणां युगपदतिरभसपाद-पाताभिहताया भुवः कम्पमिव जनयता चरणशब्देन, कर्णान्ताकृष्टज्यानाञ्च मदकल-कुररकामिनी-कण्ठकूजितकलेन शरनिकरवर्षिणां धनुषां निनादेन, पवनाहति-क्वणित-धाराणामसीनाञ्च कठिन-महिष-स्कन्धपीठपातिनां रणितेन, शुनाञ्च सरभसविमुक्त-घर्घर-ध्वनीनां वनान्तरव्यापिना ध्वानेन सर्वतः प्रचलितमिव तदरण्यमभवत्।

अचिराच्च प्रशान्ते तस्मिन् मृगयाकलकले, निर्वृष्ट-मूक जलधर-वृन्दानुकारिणि मथनावसानोपशान्तवारिणि सागर इव स्तिमिततामुपगते कानने, मन्दीभूतभयोऽहमुपजातकुतूहलः पितुरुत्सङ्गादीषदिव निष्क्रम्य कोटरस्थ एव शिरोधरां प्रसार्य्य सन्त्रास-तरल-तारकः शैशवात् किमिदमिति सञ्जात दिदृक्षः तमेव दिशं चक्षुः प्राहिणवम्।

अभिमुखमापतच्च तस्माद्वनान्तरादर्जुनभुजदण्ड-विप्रकीर्णमिव नर्म्मदाप्रवाहम्, अनिलचलितमिव तमालकाननम्, एकीभूतमिव कालरात्रीणां यामसङ्घातम्, अञ्जनशिलास्तम्भ-सम्भारमिव क्षितिकम्प-विघूर्णितम्, अन्धकारपूरमिव रविकिरणाकुलितम्, अन्तक-परिवारमिव परिभ्रमन्तम्, अवदारित-रसातलोद्भूतमिव दानवलोकम्, अशुभकर्म्म-समूहमिवैकत्र समागतम्, अनेक-दण्डकारण्यवासि-मुनिजन-शाप.सार्थमिवसञ्चरन्तम्,अनवरत-शर-निकर-वर्षि-राम-निहत-खर-

दूषण-बलमिव तदपध्यानात् पिशाचतामुपगतम् कलिकाल-बन्धुवर्गमिव एकत्र सङ्गतम्, अवगाहप्रस्थितमिव-केसरि-कराकृष्टि-पतनशीर्णमिव कालमेघपटलम्, अखिलरूप-विनाशाय धूमकेतुजालमिव समुद्गतम्, अन्धकारिताशेषकाननम्, अनेकसहस्रसंख्यम्, अतिभयजनकम्, उत्पात-वेतालव्रातमिव शबरसैन्यमद्राक्षम्।

शबरसेनापतिवर्णनम्

मध्ये च तस्यातिमहतः, प्रथमवयसि वर्तमानम्, अतिकर्कशत्वादायसमयमिव एकलव्यमिव जन्मान्तरागतम् उद्भिद्यमान-शमश्रुराजितया प्रथम-मदलेखा-मण्ड्यमान-गण्डभित्तिमिव गजयूथपतिकुमारम्, असित-कुवलयश्यामलेन देहप्रभा-प्रवाहेण कालिन्दीजलेनेव पूरयन्तमरण्यम् आकुटिलाग्रेण स्कन्धावलम्बिना कुन्तल-भारेण केसरिणमिव गजमदमलिनीकृतेन केसरकलापेनोपेतम्, आयतललाटम्,अति तुङ्ग-घोरघोणम्,उपनीतस्यैक-कर्णाभरणता-भुजगफणामणेरापाटलैरंशुभिरालोहितीकृतेन पर्णशयनाभ्यासाल्लग्न-पल्लवरागेणेव वामपार्श्वेन विराजमानम्, अचिर-हत-गज-कपोल-गृहीतेन, सप्तच्छदपरिमलवाहिना कृष्णागुरु-पङ्केनेव सुरभिणा मदेन कृताङ्गरागम्, उपरि तत्परिमलगन्धेन परिभ्रमता मायूर-पिच्छातपत्रानुकारिणा मधुकरकुलेन तमाल-पल्लवेनेव निवारितातपम्, आलोलपल्लव्याजेन भुजबल-निर्जितया भयप्रयुक्तसेवया विन्ध्याटव्येव करतलेनापमृज्यमान-गण्डस्थल-स्वेदलेखम्, आपाटलया हरिणकुल-काल-रात्रि-सन्ध्यायमानया शोणितार्द्रयेव दृष्टया रञ्जयन्तमिवाशाविभागान्, आजानुलम्बिना दिक्कुञ्जर -करप्रमाणमिव

गृहीत्वा निर्म्मितेन चण्डिका -रुधिर-बलिप्रदानार्थमसकृन्निशितशस्त्रोल्लेख -विषमित-शिखरेण भुजयुगलेनोपशोभितम्, अन्तरान्तरा लग्नश्यान-हरिण-रुधिरबिन्दुना स्वेदजल-कणिका-चितेन गुञ्जाफलमिश्रैः करिकुम्भमुक्ताफलैरिव विरचिताभरणेन विन्ध्यशिलाविशालेन वक्षःस्थलेनोद्भासमानम्, अविरत-श्रमाभ्यासादुल्लिखितोदरम्, इभ-मद-मलिनमालान-स्तम्भयुगलमुपहसन्तमिवोरुदण्डद्वयेन लाक्षा-लोहित-कौशेयपरिधानम्, अकारणेऽपि क्रूरजातितया बद्धत्रिपताकोदग्रभुकुटीकराले ललाटपट्टे प्रबलभक्त्याराधितया 'मत्परिग्रहोऽयमि'ति कात्यायन्या त्रिशूलेनेवाङ्कितम्, उपजातपरिचयैरनुगच्छद्भिः, श्रमवशात् दूरविनिर्गताभिः स्वभाव-पाटलतया शुष्काभिरपि हरिण-शोणितमिव क्षरन्तीभिर्जिह्वाभिरावेद्यमानखेदैः विवृतमुखतया स्पष्ट-दृष्ट-दन्तांशून् दंष्ट्रान्तराल -केशरिसटानिव सृक्कभागानुद्वहद्भिः, स्थूल वराटक-मालिका-परिगत-कण्ठैर्महावराह-प्रहारजर्जैः अल्पकायैरपि महाशक्तित्वादनुपजात-केसरैरिव केसरिकिशोरकैः-मृगवधू-वैधव्य -दीक्षादान- दक्षैरनेकवर्णैः श्वभिः, अतिप्रमाणाभिश्च केसरिणामभयप्रदान-याचनार्थमागताभिः सिंहीभिरिव कौलेयककुटुम्बिनीभिरनुगम्यमानम्, कैश्चिद्गृहीत -चमर-बालगजदन्तभारैः, कैश्चिदच्छिद्र-पर्ण-बद्ध-मधुपटैः कैश्चिन्मृगपतिभिरिव गज-कुम्भ-मुक्ताफलनिकर-सनाथ-पाणिभिः, कैश्चिद्यातुधानैरिव गृहीतपिशितभारैः कैश्चित् प्रमथैरिव केसरिकृत्तिधारिभिः, कैश्चित् क्षपणकैरिव मयूरपिच्छवाहिभिः, कैश्चिच्छिसुभिरिव काकपक्षधरैः, कैश्चित् कृष्णचरितमिव दर्शयद्भिः, समुत्खात-विधृत-गजदन्तैः, कैश्चिजलदागमदिवसैव जलधरच्छाया-मलिनाम्बरैः, अनेकवृत्तान्तैः शबरवृन्दैः, परिवृतम्, अरण्यमिव सखड्गधेनुकम्, अभिनव-जलधरमिव मयूर-पिच्छ-चित्र-चापधारिणम्, बकराक्षसमिव गृहीतैकचक्रम्, अरुणानुजमिवोद्धृतानेकमहानाग-दर्शनम्, भीष्ममिव शिखण्डि-शत्रुम्, निदाघदिवसमिव सतताविर्भूत-मृगतृष्णम्, विद्याधरमिव मानसवेगम्, पराशरमिव योजनगन्धानुसारिणम्, घटोत्कचमिव भीमरूपधारिणम्, अचलराजकन्यका-केशपाशमिव नीलकण्ठ-चन्द्रकाभरणम्, हिरण्याक्षदानवमिव महावराह-दंष्टा विभन्न-वक्षःस्थलम्, अतिरागिणमिव कृत-बहु--परिग्रहम्, पिशिताशनमिव रक्तलुब्धकम्, गीतकाविलासमिव निषादानुगतम्, अम्बिका-त्रिशूलमिव महिष--रुधिरार्द्रकायम्, अभिनवयौवनमपि क्षपित-बहुवयसम्, कृत-सारमेय-संग्रहमपि फलमूलाशनम्, कृष्णमप्यसुदर्शनम्, स्वच्छन्दप्रचारमपि दुर्गैकशरणम्, क्षितिभृत्पादानुवर्त्तिनमपि राजसेवानभिज्ञम्, अपत्यमिव विन्ध्याचलस्य अंशावतारमिव कृतान्तस्य, सहोदरमिव पापस्य, सारथिमिव कलिकालस्य भीषणमपि महासत्त्वतया गभीरमिवोपलक्ष्यमाणम्, अनभिभवनीयाकृतिम्, मातङ्गनामानं शबरसेनापतिमपश्यम्। अभिधानन्तु तस्य पश्चादहमश्रौषम्।

शबरचरितालोचनम्

आसीच्च मे मनसि-'अहो! मोहप्रायमेषां जीवितम्, साधुजन-विगर्हितञ्च चरितम्। तथाहि पुरुष-पिशितोपहारे धर्म्मबुद्धिः, आहारः साधुजनविगर्हितो मधुमांसादिः, श्रमो मृगया, शास्त्रं शिवारुतम्, उपदेष्टारः सदसतां कौशिकाः, प्रज्ञा शकुनिज्ञानम्, परिचिताः श्वानः, राज्यं शून्याटवीषु, आपानकमुत्सवः मित्राणि, क्रूरकर्मसाधनानि धनूंषि, सहाया विषदिग्ध-मुखा भुजङ्गा इव सायकाः, गीतमुत्सादकारि मुग्धमृगाणाम्,

कलत्राणि बन्दि-गृहीताः परयोषितः, क्रूरात्मभिः शार्दूलैः सह संवासः, पशुरुधिरेण देवताच्र्चनम्, मांसेन बलिकर्म, चौर्य्येण जीवनम्, भूषणानि भुजङ्गमणयः, वनगज -मदैरङ्गरागः, यस्मिन्नेव कानने निवसन्ति, तदेवोत्खातमूलमशेषतः कुर्वन्ति '।

इति चिन्तयत्येव मयि स शबर-सेनापतिरटवीपरिभ्रमण-समुद्भवं श्रममपनिनीषुरागत्य तस्यैव शाल्मलीतरोरधश्छायायामवतारित -कोदण्डस्त्वरितपरिजनोपनीत -पल्लवासने समुपाविशत्।

अन्यतमस्तु शबरयुवा ससम्भ्रममवतीर्य्य तस्मात् करयुगल-परिक्षोभिताम्भसः सरसो वैदूर्य्यद्रवानुकारि प्रलय-दिवसकर-किरणोपतापादम्बरैकदेशमिव विलीनम्, इन्दुमण्डलादिव प्रस्यन्दितम्, द्रुतमिव मुक्ताफल-निकरम्, अत्यच्छतया स्पर्शानुमेयं हिमजडम्, अरविन्दकोशरजः-कषायमम्भः-कमलिनीपत्रपुटेन, प्रत्यग्रोद्धृताश्च धौतपङ्कनिर्म्मला मृणालिकाः समुपाहरत्।

आपीत-सलिलश्च सेनापतिस्ता मृणालिकाः शशिकला इव सैंहिकेयः क्रमेणादशत्। अपगतश्रमश्चोत्थाय परिपीताम्भसा सकलेन तेन शबर-सैन्येनानुगम्यमानः शनैः शनैरभिमतं दिगन्तरमयासीत्।

एकतमस्तु जरच्छबरस्तस्मात् पुलिन्द-वृन्दादनासादित हरिण-पिशितः पिशिताशन इवाविकृतदर्शनः पिशितार्थी तस्मिन्नेव तरुमूले मुहूर्तमिव व्यलम्बत। अन्तरिते च तस्मिन् शबरसेनापतौ जीर्णशबरः पिबन्निवास्माकमायूंषि रुधिरबिन्दुपाटलया कपिलभ्रूलता-परिवेष भीषणया दृष्ट्या गणयन्निव शुककुल-कुलायस्थानानि श्येन इव विहगामिषास्वाद-लालसः सुचिरमारुरुक्षुस्तं वनस्पतिमामूलादपश्यत्।उत्क्रान्तमिव तस्मिन् क्षणे तदालोकन -भीतानां शुककुलानामसुभिः।

किमिव हि दुष्करमकरुणानाम्? यतः स तमनेक-ताल-तुङ्गमभ्रङ्कष-शाखाशिखरमपि सोपानैरिवायत्नेनैव पादमारुह्यताननुपजातोत्पतनशक्तीन्, कांश्चिदल्पदिवस-जातान् गर्भच्छवि-पाटलान् शाल्मली -कुसुमशङ्कामुपजनयतः, कांश्चिद्भिद्यमानपक्षतया नलिन -संवर्त्तिकानुकारिणः, कांश्चिदर्कफलसदृशाम्, कांश्चिल्लोहितायमान-चञ्चुकोटीन् ईषद्विघटित-दलपुट-पाटलमुखानां कमलमुकुलानां श्रियमुद्वहतः, कांश्चिदनवरत-शिर-कम्प-व्याजेन निवारयत इव प्रतीकारासमर्थान्, एकैकशः फलानीव तस्य वनस्पतेः साखासन्धिभ्यः कोटरान्तरेभ्यश्च शुक-शावकानग्रहीत्, अपगतासूंश्च कृत्वा क्षितावपातयत्।

शुकदशावर्णनम्

तातस्तु तं महान्तमकाण्ड एव प्राणहरमप्रतीकारमुपप्लवमुपनतमवलोक्य द्विगुणतरोपजात-वेपथुर्मरणभयादुद्भ्रान्त-तरल-तारकां विषादशून्यामश्रुजलप्लुतां दृशमितस्ततो दिक्षु विक्षिपन्, उच्छुष्कतालुरात्मप्रतीकाराक्षमः त्रास-स्रस्त-सन्धि-शिथिलेन पक्षपुटेनाच्छाद्य मां तत्कालोचितप्रतीकारं मन्यमानः स्नेहपरवशो-मद्रक्षणाकुलः किंकर्त्तव्यताविमूढः क्रोडभागेन मामवष्टभ्य तस्थौ ।

असावपि पापः क्रमेण शाखान्तरैः सञ्चरमाणः कोटरद्वारमागत्य जीर्णासितभुजङ्गभोग–भीषणं प्रसार्य्य विविध–वन–वराह–वसा–विस्रगन्धि करतलम् अनवरत –कोदण्ड–गुणाकर्षण–व्रणाङ्कित–प्रकोष्ठम् अन्तक–दण्डानुकारिणं वामबाहुमतिनृशंसो मुहुर्मुहुर्दत्तचञ्चु–प्रहारमुत्कूजन्तमाकृष्य तातमपगतासुमकरोत्। मान्तु स्वल्पशरीरत्वाद् भयसम्पीडिताङ्गत्वात् सावशेषत्वाच्चायुषः कथमपि तत्पक्ष –पुटान्तर–गतं नालक्षयत्। उपरतञ्च तमवनितले शिथिलशिरोधरमधोमुखममुञ्चत्।

अहमपि तच्चरणान्तरे निवेशितशिरोधरो निभृतमङ्क–निलीनस्तेनैव सहापतम्। आयुषोऽवशिष्टतया तु पवनवशात् पुञ्जितस्य महतः शुष्कपत्रराशेरुपरि पतितमात्मानमपश्यम्।

अङ्गानि येन मे नाशीर्य्यन्त यावच्चासौ तस्मात्तरुशिखरान्नावतरति तावदहमवशीर्ण–पर्ण–सवर्णत्वादस्फुटोपलक्ष्यमाणमूर्त्तिः पितरमुपरतमुत्सृज्य नृशंस इव प्राणपरित्यागयोग्येऽपि काले बालतया कालान्तरभुवः स्नेहरसस्यानभिज्ञो जन्मसहभुवा भयेनैव केवलमभिभूयमानः किञ्चिदुपजाताभ्यां पक्षाभ्यामीषत्कृतवष्टम्भो लुठन्नितस्ततः कृतान्तमुख–कुहरादिव विनिर्गतमात्मानं मन्यमानः नातिदूरवर्त्तिनः, शबरसुन्दरी–कर्णपूर–रचनोपयुक्त–पल्लवस्य, सङ्कर्षण–पट–नील–च्छाययोपहसत इव गदाधर–देहच्छविम्, अच्छैः कालिन्दी–जल–च्छेदैरिव विरचितच्छदस्य, वनकरिमदोपसिक्त –किसलयस्य, विन्ध्याटवी–केशपाश–श्रियमुद्वहतः, दिवाप्यन्धकारितशाखान्तरस्य, अप्रविष्ट–सूर्य्य– किरणमतिगहनपरस्येव पितुरुत्सङ्गमतिमहतस्तमालविटपिनो मूलदेशमविशम्।

अवतीर्य्य च स तेन समयेन क्षितितल– विप्रकीर्णान् संहृत्य तान् शुकशिशूननेकलता–पाश–संयतानाबद्ध्य पर्णपुटेऽतित्वरित–गमनः सेनापतिगतेनैव वर्त्मना तामेव दिशमगच्छत् ।

मान्तु लब्ध–जीविताशं प्रत्यग्र–पितमरण–शोक–शुष्क–हृदयम् अतिदूरापातादायासितशरीरं सन्त्रास–जात–वेपथुं सर्वाङ्गोपतापिनो बलवती पिपासा परवशमकरोत्।

अनया च काल–कलया सुदूरमतिक्रान्तः स पापकृदिति परिकलय्य किञ्जिदुन्नमितकन्धरो भयचकितया दृशा दिशोऽवलोक्य तृणेऽपि चलति पुनः प्रतिनिवृत्त इति तमेव पदे पदे पापकारिणमुत्प्रेक्षमाणो निष्क्रम्य तस्मात्तमालतरु मूलात् सलिले–समीपमुपसर्त्तु प्रयत्नमकरवम्।

अजातपक्षतया च नातिस्थिरतर–चरण–सञ्चारस्य मुहुर्मुहुर्मुखेन पततो मुहुस्तिर्यङ्निपतन्तमात्मनामेकया पक्षपाल्या सन्धारयतः क्षितितलसंसर्पण–श्रमातुरस्य अनभ्यासवशादेकमपि दत्त्वा पदमनवरतमुन्मुखस्य, स्थूलस्थूलं स्वसतो धूलिधूसरस्य संसर्पतो ममाभून्मनसि 'अतिकष्टासु दशास्वपि जीवित–निरपेक्षा न भवन्ति खलु जगति प्राणिनां वृत्तयः। नास्ति जीवितादन्यदभिमततरमिह जगति सर्वजन्तुनाम्। एवमुपरतेऽपि सुगृहीतनाम्नि ताते यदहमविकलेन्द्रियः पुनरेव प्राणिमि। धिङ्मामकरुणमतिनिष्ठुरमकृतज्ञम्। अहो! सोढपितृमरणशोकदारुणं येन मया जीव्यते, उपकृतमपि नापेक्ष्यते खलं हि खलु मे हृदयम्। अहं हि लोकान्तरमुपगतायामम्बायां

नियम्य शोकावेगमाप्रसव-दिवसात् परिणतवयसापि सता तातेन तैस्तैरुपायैः संवर्द्धनक्लेशमतिमहान्तमपि स्नेहवशादगणयता यत् परिपालितः, तत्सर्वमेकपदे विस्मृतम्। अतिकृपणाः खल्वमी प्राणाः, यदुपकारिणमपि तातमद्यातिगच्छन्तं नानुगच्छन्ति। सर्वथा न कञ्चित् न खलीकरोति जीवित-तृष्णा, यदीदृगवस्थमपि मामायासयति जलाभिलाषः-मन्ये चागणित-पितृमरण-शोकस्य निर्घृणतैव केवलमियं मम सलिलपानबुद्धिः। अद्यापि दूरत एव सरस्तीरम्। तथाहि जलदेवतानूपुर-रवानुकारी दूरेऽद्यापि कलहंस-विरुतमेतत्, अस्फुटानि श्रूयन्ते सारससितानि, विप्रकर्षादाशामुखविशर्पण-विरलः सञ्चरति नलिनी-षण्डपरिमलः। दिवसस्येयमति-कष्टा दशा वर्तते। तथाहि रविरम्बरतलमध्यवर्ती स्फुरन्तमातपमनवरतमनल-धूलि-निकरमिव विकिरति करैः। अधिकामुपजनयति तृषम्। आतप--सन्तप्त-पांसु-पटल-दुर्गमा भूः, अतिप्रबल-पिपासावसन्नानि गन्तुमल्पमपि मे नालमङ्गकानि, अप्रभुरस्म्यात्मनः सीदति मे हृदयम्, अन्धकारतामुपयाति चक्षुः अपि नाम खलो विधिरनिच्छतोऽपि मे मरणमद्यैव उपपादयेत्।'

हारीतवर्णनम्

इत्येवं चिन्तयत्येव मयि तस्मात् सरसोऽ दूरवर्त्तिनि तपोवने जाबालिर्नाम महातपा सुनिः प्रतिवसति स्म। तत्तनयश्च हारीतनामा मुनिकुमारकः सनत्कुमार इव सर्वविद्यावदातचेताः, समानवयोभिरपरैस्तपोधन-कुमारकैरनुगम्यमानस्तेनैव पथा द्वितीय इव भगवान् विभावसुरतितेजस्वितया दुर्निरीक्ष्यमूर्त्तिः, उद्यतो दिवसकर-मण्डलादिवोत्कीर्णः तडिद्भिरिव विरचितावयवः, तप्त-कनक-द्रवेणेव बहिरुपलिप्त-मूर्त्तिः, पिशङ्गावदाताय देह-प्रभया स्फुरन्त्या सबालातपमिव सदावानलमिव वनमुपदर्शयन्, उत्तप्त-लौहलोहिनीनामनेक-तीर्थाभिषेकपूतानामंसस्थलावलम्बिनीनां जाटानां निकरेणोपेतः, स्तम्भितशिखा-क्लापः, खाण्डववन-दिधक्षया कृत-कपट-बटुवेश इव भगवान् पावकः, तपोवनदेवतानूपुरानुकारिणा धर्मशासन-कटकेनेव स्पाटिकेनाक्षवलयेन दक्षिणश्रवणावलम्बिना विराजमानः, सकल-विषयोपभोग- निवृत्यर्थमुपपादितेन ललाटपट्टके त्रिसत्येनेव भस्मत्रिपुण्ड्रकेणालङ्कृतः, गगन-गमनोन्मुखबलाकानुकारिणा स्वर्गमार्गमिव दर्शयता सततमुद्ग्रीवेण स्फटिक-मणि-कमण्डलुनाध्यासित-वासकरतलः, स्कन्धदेशावलम्बिना कृष्णाजिनेन नीलपाण्डुभासा तपस्तृष्णानिपीतेनान्तर्निष्पतता धूमपटलेनेव परीतमूर्त्तिः, अभिनव-बिससूत्र-निर्मितेनेव परिलघुतया पवनलोलेन निर्म्मांस-विरलपार्श्वास्थिपञ्जरमिव गणयता वामांसावलम्बिना यज्ञोपवीतेनोद्भासमानः, देवतार्च्चनार्थमागृहीत-वनलता-कुसुम-परिपूर्णपर्णपुट-सनाथा-शिखरेणाषाढदण्डेन व्यापृत- सव्येतरपाणिः, विषाण - शिखरोत्खातामुद्वहता स्नानमृदमुपजात-परिचयेन नीवारमुष्टि-संवर्धितेन कुश-कुसुम-लतायास्यमान -लोल-दृष्टिना तपोवनमृगेणानुगम्यमानः विटप-इव-कोमल-वल्कलावृत-शरीरः गिरिरिव समेखलः, राहुरिवासकृदास्वादित-सोमः, पद्मनिकर इव दिवसकर -मरीचिषः, नदी-तट-तरुरिव सततजल-क्षालन-विमलजटः, करि-करभ इव विकच-मुकुद-दल-शकलसित-दशनः, द्रौणिरिव कृपानुगतः, नक्षत्रराशिरिव चित्रमृग-कृत्तिकाश्लेषोपशोभितः, धर्म्मकाल-दिवस इव क्षयित-दोषः, जलधरसमय इव प्रशमितरजःप्रसरः, वरुम इव कृतोदवासः, हरिरिवापनीतनरकभयः, प्रदोषारम्भ इव सन्ध्या-पिङ्गलतारकः प्रभातकाल इव

बालातप-कपिलः, रविरथ इव दृढनियमिताक्षचक्रः, सुराजेव निगूढ-मन्त्रसाधन-क्षपित-विग्रहः,जलधिरिवकराल शङ्खमण्डलावर्त्त-नाभिगर्त्तः, भगीरथ दृष्ट-गङ्गावतारः, भ्रामर इवासकृदनुभूतपुष्कर-वनवासः, वनचरोऽपि कृतमहालयप्रवेशः, असंयतोऽपि मोक्षार्थी, सामप्रयोगपरोऽपि सततावलम्बितदण्डः, सुप्तोऽपि प्रबुद्धः सन्निहितनेत्रद्वयोऽपि परित्यलवामलोचनस्तदेव कमलसरः सिस्नासुरुपागमत्।

प्रायोणाकारण-मित्राण्यतिकरुणार्द्राणि च सदा खलु भवन्ति सतां चेतांसि। यतः स मां तदवस्थमालोक्य समुपजातकरुणः समीपवर्त्तिनमृषिकुमारकमन्यतममब्रवीत् ठअयं कथमपि शुक-शिशुरसञ्जात-पक्षपुट एव तरुशिखरादस्मात् परिच्युतः। श्येन-मुख-परिभ्रष्टेन वाऽनेन भवितव्यम्। ततोह्यस्याल्पशेषं जीवितम्, अयमामीलित-लोचनो मुहुर्मुहुरत्युल्बणं श्वसिति, मुहुर्मुहुर्मुखेन पतति, मुहुर्मुहुश्चञ्चुपुटं विवृणोति, न शक्नोति शिरोधरां धारयितुम्। तदेहि यावदेवायमसुभिर्न विर्मुच्यते तावदेव गृहाणेमम् अवतारय सलिलसमीपम्' इत्यभिधाय तेन मां सरस्तीरमनाययत्।

उपसृत्य च जल-समीपमेकदेश-निहित-कमण्डलुरादाय स्वयं मां मुक्तप्रयत्नम् उत्तानित-मुखम् अङ्गुल्या कतिचित् सलिल-बिन्दूनपाययत्। अम्भःक्षोदकृतसेकञ्च समुपजातप्रज्ञम् उपतट-प्ररूढ-नलिनी-पलाशस्य जलशिरायां छायायां निधाय यथासमुचितमकरोत् स्नानविधिम् अभिषेकावसाने चानेकप्राणायामपूतोऽपि जपन्नघमर्षणानि प्रत्यग्रभग्नैरुन्मुखो रक्तारविन्दैर्नलिनीपत्र-पुटेन भगवते सवित्रे दत्त्वार्घमुदतिष्टत्। आगृहीत-धवल-वल्कलश्च सज्योत्स्न इव सन्ध्यातपः करतल-निर्धूनन-विशद-सटः प्रत्यग्रस्नानार्द्र-जटेन सकलेन तेन मुनिकुमार-कदम्बकेनानुगम्यमानो मां गृहीत्वा तपोवनाभिमुखं शनैः शनैरगच्छत्।

जाबाल्याश्रमवर्णनम्

अनतिदूरमिव गत्वा दिशि सदासन्निहित-कुसुमफलैः ताल-तिलकतमाल -हिन्तालबकुल-बहुलैः, एलालताकुलित-नारिकेल-कलापैः-आलोल-लोध्र-लवली-लवङ्ग-पल्लवैः, उल्लसत् चूत-रेणु-पटलैः, अलिकुल-झङ्कार-मुखर-सहकारैः, उन्मद-कोकिल-कुल--कलालाप-कोलाहलिभिः, उत्फुल्ल-केतकी-कुसुम-मञ्जरीरजःपुञ्च-पिञ्जरैः, पूगीलता-दोलाधिरूढ-वनदेवतैः, तारकावर्षमिवाधर्म्म- विनाश-पिशुनं कुसुम-निकरमनिल-चलितमनवरतमतिधवलमुत्सृजद्भिः, संसक्तपादपः काननौपगूढम्, अचकित -प्रचलित-कृष्णसार-शत-शवलाभिः, उत्फुल्ल-स्थलकमलिनी-लोहिनीभिः, मारीचमायामृगावलून-प्ररूढ-वीरुद्लाभिः, दाशरथि-चाप-कोटि-क्षतकन्द-गर्त्तविषमित-तलाभिः, दण्डकारण्यस्थलीभिरुपशोभितप्रान्तम्, आग्रहीतसमित्कुशकुसुममृद्भिः अध्ययन मुखर-शिष्यानुगतैः सर्वतः प्रविशद्भिः मुनिभिरशून्योपकण्ठम्, उत्कण्ठितशिखण्डिमण्डल -श्रूयमाणजल-कलशपूरणध्वानम्, अनवरताज्याहुतिप्रीतैश्चित्रभानुभिः सशरीरमेव मुनिजनममरलोकं निनीषुभिः, उद्धूयमान-धूम-लेखाच्छलेनाबद्ध्यमान-स्वर्गमार्ग-गमन-सोपनान-सेतुमिवोपलक्ष्यमाणम्, आसन्नवर्तिनीभिस्तपोधन-सम्पर्कादिवापगतकालुष्याभिः, तरङ्ग-परम्परा-संक्रान्त-

रविबिम्ब -पङ्क्तिभिः, तापसदर्शनागतसप्तर्षि-मालाविगाह्यमानाभिरिव, अतिविकच-कुमुदवनमृषिजनमुपासितुमवतीर्ण ग्रहगणमिव निशासूद्वहन्तीभिदीर्घिकाभिः परिवृतम्, अनिलावनमित-शिखराभिः प्रणम्यमानमिव वनलताभिः अनवरतमुक्त-कुसुमैरभ्यर्च्यमानमिव पादपैः, आबद्ध-पल्लवाञ्जलिभिः उपास्यमानमिव विटपैः, उटजाजिर-प्रकीर्ण-शुष्यच्छ्यामाकम्, उपसंगृहीतामलवली-लवङ्ग-कर्कन्धू-कदली-लकुच- चूतपनस-तालफलम्, अध्ययनमुखर-बहुजनम्, अनवरत-श्रवण-गृहीत-वषट्कार-वाचालशुककुलम्, अनेक-सारिकोद्घुष्यमाण-सुब्रह्मण्यम्, अरण्य-कुक्कुटोपभुज्यमान-वैश्वदेवबलिपिण्डम्, आसङ्ग- वापी-कलहंसपोत-भुज्यमान-नीवारवलिम्, एणो-जिह्वापल्लवोपलिह्यमानमुनिबालकम्, अग्निकार्य्यार्द्धदग्धसिमसिमायमान-कुश-समित्कुसुमम्, उपल-भग्ननारिकेल-रसस्निग्धशिलातलम्, अचिर-क्षुण्ण-वल्क-सर-पाटलभूतलम्, रक्तचन्दनोपलिप्तादित्यमण्डल-निहित-करवीर-कुसुमम्, इतस्ततो विक्षिप्त-भस्मलेखा-लङ्कृत-मुनिजनभोजन-भूमिभागम्, परिचित-शाखामृग-कराकृष्टयष्टि -निष्काश्यमान-प्रवेश्यमान-जरदन्धतापसम्, इभ--करभकार्द्धोपभुक्तपतितैः सरस्वती-भूजलता -विगलितैः शङ्खवलयैरिव मृणालशकलैः कल्ममाषितम्, ऋषिजनार्थमेणकैर्विषाण- शिखरोत्खन्यमानविविध-कन्दमूलम्, अम्बु पूर्णपुष्कर-पुटैर्वनकरिभिरापूर्य्यमाण-विटपालवालकम्, ऋषिकुमारकाकृष्यमाण-वनवराहदंष्ट्रान्तराल-लग्न-शालूकम्, उपजात-परिचयैः कलापिभिः पक्षपुटपवन-सन्धुक्ष्यमाण मुनिहोम-हुताशनम्, आरब्धामृत-चरु-चारुगन्धम्, अर्द्धपक्व-पुरोडाश -पुण्य-परिमलामोहितम्, अविच्छन्नाज्यधारा-हुति-हुतभुगहुङ्कार-मुखरितम्, उपचर्य्यमाणातिथिवर्गम्, पूज्यमानपितृ-दैवतम्, अर्च्यमान हरि-हर-पितामहम्, उपदिश्यमान-श्राद्धकल्पम्, व्याख्यायमानयज्ञविद्यम्, आलोच्यमान -धर्म्मशास्त्रम्, पठ्यमान -विविध-पुस्तकम्, विचार्य्यमाण-सकलशास्त्रार्थम्, आरभ्यमाण-पर्णशालम्, उपलिप्यमानाजिरम्, उपमृज्यमानोटजाभ्यन्तरम्, आबध्यमानध्यानम्, साध्यमान-मन्त्रम्, अभ्यस्यमान-योगम्, उपह्रियमाण -वनदेवतावलिम्, निर्वर्त्त्यमान-मौञ्जमेखलम्, प्रक्षाल्यमान-वल्कम्, उपसंगृह्यमाण-समिधम्, संस्क्रियमाणकृष्णाजिनम्, गृह्यमाण-गवेधुकम्, शोष्यमाण-पुष्करम्, ग्रथ्यमानाक्षमालम्, गृह्यमाणत्रिपुण्ड्रकम्, न्यस्यमान-वेत्रदण्डम्, आपूर्य्य-कमण्डलुम्, अदृष्टपूर्व कलिकालस्य, अपरिचितमनृतस्य, अश्रुतपूर्वमनङ्गस्य, श्रब्जयोनीमिव त्रिभुवन-वन्दितम्, असुरारिमिव प्रकटितवराहनरसिंहरूपम्, सांख्यमिव कपिलाधिष्ठितम् मथुरोपवनमिव बलावलीढ-दर्पितधेनुकम्, उदयनमिवानन्दितवत्स-कुलम्, किम्पुरुषादिराज्यमिव मुनिजनगृहीत कलशाभिषिच्यमान-द्रुमम्, निदाघसमयावसानमिव आसन्न-जलप्रपातम्, जलधरसमयमिव वनगहन-मध्य-सुख-सुप्त हरिम्, हनूमन्तमिव-शिला-शकल-प्रहार-सञ्चूर्णिताक्षा-स्तिसञ्चयम्, खाण्डव-विनाशोद्यतार्जुनमिव प्रारब्धाग्निकार्य्यम्, सुरभिविलेपनधरमपि सतताविर्भूतधूमगन्धम् मातङ्गकुलाध्यासितमपि पवित्रम्, उल्लसित-धूमकेतुशतमपि प्रशान्तोपद्रवम् परिपूर्णद्विजपति-मण्डल-सनाथमपि सदा-सन्निहित-तरु- गहनान्धकारम्, अतिरमणीयमपरमिव ब्रह्मलोकमाश्रममपश्यम्।

यत्र च मलिनता हविर्धूमेषु न चरितेषु, मुखरागः शुकेषु न कोपेषु, तीक्ष्णता कुशाग्रेषु न स्वभावेषु, चञ्चलता कदलीदलेषु न मनःसु, चक्षूरागः कोकिलेषु न परकलत्रेषु कण्ठग्रहः कमण्डलुषु न सुरतेषु, मेखलाबन्धो व्रतेषु नेर्ष्याकलहेषु, स्तनस्पर्शो होमधेनुषु न वनितासु, पक्षपातः कृकवाकुषु न विद्याविवादेषु, भ्रान्तिरनलप्रदक्षिणेषु, न शास्त्रेषु वसुसङ्कीर्त्तनं दिव्यकथासु न तृष्णासु, गणना रुद्राक्ष-वलयेषु न शरीरेषु, मुनि-बाल-नाशः क्रतु-दीक्षया न मृत्युना, रामानुरागो रामायणेन न यौवनेन, मुखभङ्गविकारो जरया न धनाभिमाने।

यत्र च महाभारते शकुनि-वधः, पुराणे वायु-प्रलपतिम्, वयःपरिणामे द्विज-पतनम्, उपवन-चन्दनेषु जाड्यम्, अग्नीनां भूतिमत्त्वम्, एणकानां गीतश्रवणव्यसनम्, शिखण्डिनां नृत्यपक्षपातः, भुजङ्गमानां भोगः, कपीनां श्रीफलाभिलाषः, मूलानामधोगति

।।इति जाबाल्वाश्रमवर्णनं समाप्तम्।।

।।अथ जाबालिवर्णनम्।।

तस्य चैवंविधस्य मध्यभागमलङ्कुर्वाणस्य, अलक्तकालोहित-पल्लवस्य मुनिजनालम्बित -कृष्णाजिन-जल-करङ्क-सनाथशाखस्य तापसकन्यकाभिर्मूलभाग-दत्त-पीत-पिष्टातकानेक पञ्चाङ्गुलस्य हरिणशिशुभिः परिपीयमानालवाल-सलिलस्य मुनिकुमारकाबद्ध-कुशचीरदाम्नो हरितगोमयोपलेपन-विविक्ततलस्य तत्क्षण-कृत-कुसुमोपहार-रमणीयस्य नातिमहतः परिमण्डलतया विस्तीर्णावकाशस्य रक्ताशोकतरोरधश्छायायामुपविष्टम्, अत्युग्रतपोभि-भुवनमिव सगरैः कनकगिरिमिव कुलाचलैः क्रतुमिव वैतान-वह्निभिः कल्पान्तदिवसमिव रविभिः, कालमिव कल्पैः, समन्तान्महर्षिभिः परिवृतम्, उग्र-शाप-भीतयेव कम्पितदेहया, प्रणयिन्येव विहित-केशग्रहया, क्रुद्धयेव कृत-भ्रूभङ्गया, मत्तयेवाकुलितगमनया, प्रसाधितयेव प्रकटित-तिलकया जरया, गृहीतव्रतयेव भस्मधवलया धवलीकृत-विग्रहम्, आयामिनीभिः पलित-पाण्डुराभिः तपसा विजित्य मुनिजनमखिलं धर्म्मपताकाभिरिवोच्छ्रिताभिः अमरलोकमारोढुं पुण्य-रज्जुभिरिवोपसंगृहीताभिः अतिदूर-प्रवृद्धस्य तपस्तरोः कुसुम-मञ्जरीभिरिवोद्गताभिर्जटाभिरुपशोभमानम्, उपरचित-भस्म-त्रिपुण्ड्रकेण तिर्य्यक्प्रवृत्त-त्रिपथगा- स्रोतत्रयेण हिमगिरि-शिलातलेनेव ललाटफलकेनोपेतम्, अधोमुखचन्द्र-कलावराभ्यामवलम्बित-बलि-शिथिलाभ्यां भ्रूलताभ्यामवष्टभ्यमान-दृष्टिम्, अनवरतमन्त्राभ्यास-विवृताधरपुटया निषतद्भिरतिशुचिभिः सत्यप्ररोहैरिव स्वच्छेन्द्रिय-वृत्तिभिरिव विद्यागुणैरिव करुणरस-प्रवाहैरिव दशनमयूखैर्धवलित-पुरोभागम्, उद्वमदमलगङ्गा-प्रवाहमिव जह्नुम्, अनवरत सोमोद्गारसुगन्धिनिश्वासावकृष्टैर्मूर्त्तिमद्भिरिव शापक्षरैः सदा मुखभागा-सन्निहितैः परिस्फुरद्भिरलिभिरविरहितम्,

अतिकृशतया निम्नतर-गण्डगर्त्तम् उन्नततर हतु-धोणम् आकराल-तारकम् अवसीर्य्यमाण-विरल-नयन-पक्ष्ममालम् उद्‌गतदीर्घरोम-रुद्ध-श्रवण-विवरम् आनाभिलम्बित-कूर्च्चकलापमाननमादधानम्, अतिचपलानामिन्द्रियाश्वानाम् अन्तःसंयमन-रज्जुभिरिवातताभिः कण्ठनाडीभिनिरन्तरावनद्ध-कन्धरम्, समुन्नत-विरलास्थि-पञ्जरम्, अंसालम्बित-धवल-यज्ञोपवीतम्, अनिल-वशाजनित-तनु-तरङ्ग-भङ्गम् उत्प्लवमान-नवमृणालमिव मन्दाकिनीप्रवाहम्, अकलुषमङ्गमुद्वहन्तम्, अमल-स्फटिक-शकल-घटितमक्षवलयमत्युज्ज्वलस्थूल -मुक्ताफल-प्रथितं सरस्वतीहारमिव चलदङ्गुलि-विवर-गतमावर्त्तयन्तम्, अनवरतभ्रमित-तारकाचक्रमपरमिव ध्रुवम्, उन्नमता शिरा-जालकेन जरत्कल्पतरुमिव परिणतलतासञ्चयेन निरन्तर-निचितम्, अमलेन चन्द्रांशुभिरिवामृतफेनैरिव गुणसन्तान-तन्तुभिरिव निर्म्मितेन मानस-सरो-जलक्षालनशुचिना दुकूलवल्कलेन द्वितीयेनेव जराजालकेन संच्छादितम्, आसन्नवर्त्तिना मन्दाकिनीसलिल-पूर्णेन त्रिदण्डोपविष्टेन स्फाटिक-कमण्डलुना विकचपुण्डरीकराशिमिव राजहंसेनोपशोभमानम्, स्थैर्येणाचलानां गाम्भीर्य्येण सागराणां तेजसा सवितुः प्रशमेन तुषाररश्मेः निर्म्मलतयाऽम्बरतलस्य संविभागमिव कुर्व्वाणम्, वैनतेयमिव स्वप्रभावोपात्तसकल -द्विजाधिपत्यम्, कमलासनमिवाश्रमगुरुम्, जरच्चन्दनतरुमिव भुजङ्गनिर्म्मोक-धवलजटाकुलम्, प्रशस्त-वारणमिव प्रलम्ब-कर्णबालम्, बृहस्पतिमिवाजन्मवर्द्धित-कचम्, दिवसमिवोद्यदर्क-बिम्ब-भास्वर-मुखम्, शरत्कालमिव क्षीणवर्षम्, शन्तनुमिव प्रियसत्यव्रतम्, अम्बिका-करतलमिव रुद्राक्ष-ग्रहण-निपुणम्, शिशिर-समयसूर्य्यमिव कृतोत्तरासङ्गम्, वडवानलमिव सतत-पयोभक्ष्यम्, शून्यनगरमिव दीनानाथविपन्नशरणम्, पशुपतिमिव भस्म-पाम्डु-रोमाश्लिष्ट-शरीरम्, भगवन्तं जाबालिमपश्यम्।

अवलोक्य चाहमचिन्तयम्-'अहो प्रभावस्तपसाम्! इयमस्य शान्तापि मूर्त्तिरुत्तप्तकनकावदाता परिस्फुरन्ती सोदामिनीव चक्षुषः प्रतिहन्ति तेजांसि, सततमुदासीनापि महाप्रभावतया भयमिवोपजनयति प्रथमोपगतस्य शुष्क-नल-काश-कुसुम-निपतितानलचटुल-वृत्ति-नित्यमसहिष्णुपस्विनां प्रतनुतपसामपि तेज-प्रकृत्य दुःसहं भवति, किमुत सकल-भुवन-वन्दित-चरणानामनवरत-तपःसलिल--क्षालितमलानां कर-कमल-तलामलकफलवदखिलं जगदालोकयतां दिव्येन चक्षुषा भगवतामेवंविधानामघक्षयकारिणाम्। पुण्यानि हि नाम ग्रहणान्यपि महामुनीनाम्, पुनर्दर्शनानि। धन्यमिदमाश्रमपदमयमधिपतिर्यत्र। अथवा भुवनतलमेव धन्यमखिलमनेनाधिष्ठितमवनितल-कमलयोनिना। पुण्यभाजः खल्वमी मुनयो यदहर्निशमेनमपरमिव नलिनासनमपगतान्यव्यापारा मुखावलोकन-निश्चलदृष्टयः पुण्याः कथाः सृण्वन्तः समुपासते। सरस्वत्यपि धन्या, याऽस्य तु सततमतिप्रसन्ने करुणजलनिस्यन्दिन्यगाधगाम्भीर्य्ये रुचिरद्विजपरिवारा मुखकमलसम्पर्कसुखमनुभवन्ती निवसति राजहंसीव मानसे।

चतुर्मुखमुखकमलवासिभिश्चतुर्वेदैः सुचिरादिव द्वितीयमिदमासादितं स्थानम्। एनमासाद्य शरत्कालमिव कलिकाल-जलधरसमय-कलुषिताः प्रसादमुपगताः पुनरपि जगति सरित इव सर्वविद्याः। नियतमिह सर्वात्मना कृतावस्थितिना भगवता परिभूत-कलिकाल-विलसितेन धर्म्मेण न स्मर्य्यते कृतयुगस्य। धरणितलमनेनाधिष्ठितमालोक्य न वहति नूनमिदानीं सप्तर्षिमण्डल -निवासाभिमानमम्बरतलम्। अहो! महासत्त्वेयं

जरा, यास्य प्रलय-रवि--कर-निकर--दुर्निरीक्ष्ये रजनिकर-किरण-पाण्डु-शिरोरुहे जटाभारे फेनपुञ्ज-धवला गङ्गेव पशुपतेः क्षीराहुतिरिवशिखाकलापे विभावसोर्निपतन्ती न भीता। बहलाज्य-धूम-पटल-मलिनीकृताश्रमस्य भगवतः प्रभावासोर्निपतन्ती रवि-किरणजालमपि दूरतः परिहरति तपोवनम्। एते च पवनलोल-पुञ्जीकृत -शिखाकलापा रचिताञ्जलय इवात्र मन्त्रपूतानि हवींषि गृह्णन्ति एतत्प्रतीत्याशुशुक्षणयः। तरलित-दूकूलवल्कलोऽयञ्चाश्रमलता-कुसुम-सुरभि-परिमलो मन्दमन्दसञ्चारी सशङ्क इवास्य समीपमुपसर्पति गन्धवाहः। प्रायो महाभूतानामपि दुरभिभवानि भवन्ति तेजांसि। सर्वतेजस्विनामयञ्चाग्रणीः। द्विसूर्य्यमिवाभाति जगदनेनाधिष्ठितं महात्मना। निष्कम्पेव क्षितिरेतदवष्टम्भात्। एष प्रवाहः करुणारसस्य, सन्तरणसेतुः संसारसिन्धोः, आधारः क्षमाम्भसाम् सागरः सन्तोषामृत -रसस्य, उपदेष्टा सिद्धिमार्गस्य, अस्तगिरिरसद्ग्रहस्य मूलमुपशमतरोः, नाभिः प्रज्ञाचक्रस्य प्रासादो धर्म्मध्वजस्य, तीर्थं तीर्थः। सर्वविद्यावताराणाम्, वडवानलो लोभार्णवस्य, निकषोपलः शास्त्ररत्नानाम्, दावानलो रागपल्लवस्य, महामन्त्रः क्रोधभुजङ्गस्य, दिवसकरो मोहान्धकारस्य, अर्गलबन्धो नरक--द्वाराणाम्, कुलभवनमाचराणाम्, आयतनं मङ्गलानाम्, अभूमिर्मदविकाराणाम्, दर्शकः सत्पथानाम्, साधुतायाः, नेमिरुत्साह-चक्रस्य, आश्रयः सत्त्वस्य, विपक्षः कलिकालस्य, कोशस्तपसः, सखा सत्यस्य, क्षेत्रमार्जवस्य, प्रभवः-पुण्यसञ्चयस्य, अदत्तावकाशो मत्सरस्य, अरातिर्विपत्तेः, अस्थानं परिभूतेः अननुकूलोऽभिमानस्य, असम्मतो दैन्यस्य, अनायत्तो रोषस्य, अनभिमुखः सुखानाम्।

अस्य भगवतः प्रभावादेवोपशान्तवैरमपगतमत्सरं तपोवनम्।

अहो! प्रभावो महात्मनाम्। अत्र हि शाश्वतिकमपहाय विरोधमुपशान्तान्तरात्मानस्तिर्य्यञ्चोऽपि तपोवन-वसति-सुखमनुभवन्ति। तथा हि एष विकचोत्पलवन-रचनानुकारिणमुत्पतच्चारुचन्द्रकशतं हरिण-लोचन-द्युति-शबलमभिनव-शाद्वलमिव विशति शिखिनः कलापमातपाहतो निःशङ्कमहिः। अयमुत्सृज्य मातरमजातकेशरैः केशरिशिशुभिः सहोपजातपरिचयः क्षरत्क्षीरधारं पिबति कुरङ्ग-शावकः सिंहीस्तनम्। एष मृणालकलापाशङ्किभिः शशिकर-धवलं सटाभारम् आमीलितलोचनो बहु मन्यते द्विरदकलभैराकृष्यमाणं मृगपतिः। इदमिह कपि-कुलमपगत-चापलमुपनयति मुनि-कुमारकेभ्यः स्नातेभ्यः फलानि। एते च न निवारयन्ति मदान्धा अपि गण्डस्थलीभाञ्जि मदजल-पाननिश्चलानि मधुकर-कुलानि सञ्जातवयाः कर्णतालैः करिणः। किं बहूना, तापसाग्निहोत्रधूमलेखाभिरुत्सर्पन्तीभिरनिशमुपपादित-कृष्णाजिनोत्तरासङ्ग-शोभः फलमूलभृतो वल्कलिनो निश्चेतनास्तरवोऽपि सनियमा इव।'

इत्येवं चिन्तयन्तमेव मां तस्यामेवाशोकतरोरधश्छायामेकदेशे स्थापयित्वा हारितः पादावुपगृह्य कृताभिवादनः पितुरनतिसमीपवर्त्तिनि कुशासने समुपाविशत्। आलोक्य तु मां सर्वएव मुनयः 'कुतोऽयमासादितः शुकशिशुः' इति तमासीनमपृच्छन्। असौ तु तानब्रवीत्-'अयं मया स्नातुमितो गतेन कमलिनीसरस्तीर-तरु-नीड-पतितः शुक-शिशुरातपजनित-क्लान्तिरुत्तप्तपांशुपटल-मध्यगतो दूर-निपतन-विह्वल-

तनुरल्पावशेषायुरासादितः, तपस्विदुरारोहतया च तस्य वनस्पतेर्न शक्यते स्वनीडमारोपयितुमिति जातदयेनानीतः। तद्यावदयमप्ररूढपक्षतिरक्षमोऽन्तरीक्षमुत्पतितुम्, तावदत्रैव कस्मिंश्चिदाश्रमतरुकोटरे मुनिकुमारकैरस्माभिश्चोपनीतेन नीवार-कण-निकरेण विविधफलरसेन च संबद्ध्यमानो धारयतु जीवितम्। अनाथ-परिपालनं हि धर्म्मोऽस्मद्विधानाम्। उद्भिन्नपक्षतिस्तु गगनतलसञ्चरणसमर्थो यास्यति यत्रास्मै रोचिष्यते। इहैवोपजात-परिचयः स्थास्यति।'

इत्येवमादिकमस्मत्संबद्धमालापमाकर्ण्य. किञ्चिदुपजात-कुतूहलो भगवान् जाबालिरीषदावलितकन्धरः पुण्यजलैः प्रक्षालयन्निव मामतिप्रशान्तया दृष्ट्या दृष्ट्वा सुचिरमुपजातप्रत्यभिज्ञान इव पुनः पुनर्विलोक्य 'स्वस्यैवाविनयस्य फलमनेनानुभूयते' इत्यवोचत्।

स हि भगवान् कालत्रयदर्शी तपःप्रभावाद्दिव्येन सर्वमेव करतलगतमिव जगदवलोकयति, वेत्ति च जन्मान्तराण्यप्यतीतानि, कथयत्यागामिनमप्यर्थम्, ईक्षण-गोचरगतानाञ्च प्राणिनामायुषः संख्यामावेदयति ।

ततः सर्वैव सा तापस-परिपच्छ्रुत्वा विदित-तत्प्रभावा कीदृशोऽनेनाविनयःकृतः, किमर्थं वा कृतः, क्व वा कृतः, जन्मान्तरे वा कोऽयमासीत्' इति कुतूहलिन्यभवत्, असकृदुपयाचितवती च तं भगवन्तम्- 'आवेदय प्रसीद भगवन्! कीदृशस्याविनयस्य फलमनेनानुभूयते, विहगजातौ वा कथमस्य सम्भवः, किमभिधानो वाऽयम्, अपनयतु नः कुतूहलम् आश्चर्य्याणां हि सर्वेषां भगवान् प्रभवः।'

इत्येवमुपयाचितस्तपोधनपरिषदा स महामुनिः प्रत्यवदत् ठअतिमहदिदमाश्चर्य्यमाख्यातव्यम्, अल्पशेषमहः प्रत्यासीदति च नः स्नानसमयः, भवतामप्यतिक्रामति देवार्च्चनविधिवेला, तदुत्तिष्ठन्तु भवन्तः सर्व एव तावदाचरन्तु यथोचितं दिवस-व्यापारम्, अपराह्णसमये भवतां पुनः कृत- फलमूलाशनानां विस्रब्धोपविष्टानामादितः प्रभृति सर्वमावेदयिष्यामि। योऽयं यच्च कृतमनेनापरस्मिन् जन्मनि, इह लोके च यथास्य सम्भूतिः अयञ्च तावदपगतक्लमः क्रियतामाहारेण। नियतमयमप्यात्मनो जन्मान्तरोदन्तं स्वप्नोपलब्धमिव मयि कथयति, सर्वमशेषतः स्मरिष्यति' इत्यभिदधदेवोत्थाय समं तैर्मुनिभिः स्नानादिकमुचित-दिवस-व्यापारम् अकरोत्।

अनेन च समयेन परिणतो दिवसः। स्नानोत्थितेन मुनिजनेनार्घविधिमुपपादयता यः क्षितितले दत्तः तमम्बर-तलगतः साक्षादिव रक्तचन्दनाङ्गरागं रविरुदवहत्। ऊर्ध्वमुखैरर्कबिम्ब-निहित - दृष्टिभिरूष्मपैस्तपोधनैरिव परिपीयमान-तेजःप्रसरो विरलातपस्तनिमानमभजत्। उद्यत्सप्तर्षिसार्थ- स्पर्श-परिजिहीर्षयेव संहृत-पादः पारावत- पादपाटलरागो रविरम्बरतलादलम्बत। आलोहितांशु-जालं जलशयनमध्यगस्य मधु-रिपो-र्विगलन्मधुधारमिव नाभि-नलिनं प्रतिमागतमपरार्णवे सूर्य्यमण्डलमलक्ष्यत। विहाय धरणितलम् उन्मुच्य च कमलिनीवनानि शकुनय इव दिवसावसाने तरु-शिखरेषु पर्वताग्रेषु च रविकिरणाः स्थितिमकुर्वत। आलग्न-लोहितातपच्छेदा मुनिभिरालम्बित -लोहित-वल्कला इव-तरवः अलक्ष्यन्त। अस्तमुपगते च भगवति सहस्रदीधितावपरार्णवतटात् उल्लसन्ती विदद्रुम-लतेव पाटला सन्ध्या

समदृश्यत। यस्यामाबध्यमानध्यानम्, एकदेशदुह्यमाना-होमधेनु-दुग्धाराध्वनितधन्यतरातिमनोहरम् अग्निहोत्र-वेदि -विप्रकीर्य्यमाण-हरित्कुशम् ऋषिकुमारिकाभिरितस्ततो विक्षिप्यमाण-दिग्देवतार्च्चन-वलि-सिक्थकम् आश्रमपदमभवत्। क्वापि विहृत्य

दिवसावसाने लोहिततारकातपोवनधेनुरिव कपिला परिवर्त्तमाना सन्ध्या मुदितैस्तपोधनैदृश्यत। अचिरप्रोषिते च सवितरि शोक-विधुरा कमल-मुकुलकमण्डलु-धारिणी हंस-सितदुकूल-परिधाना मृणाल-धवल-यज्ञोपवीतिनी मधुकर-मण्डलाक्षवलयम् उद्वहन्ती कमलिनी दिनपति-समागम-व्रतमिवाचरत्। अपर-सागराम्भसि पतिते तत्पतन-वेगोत्थितम् अम्भःशीकर-निकरमिव तारागणमम्बरम् अधारयत्। अचिराच्च सिद्ध-कन्यका-विक्षिप्त- सन्ध्यार्च्चन-कुसुम-शबलमिव तारकितँ वियदराजत। क्षणेन चोन्मुखेन मुनिजनेनोर्ध्व-विप्रकीर्णैः प्रणामाञ्जलि-सलिलैः प्रक्षाल्यमान इवागलदखिलः सन्ध्यारागः।

क्षयमुपगतायाञ्च सन्ध्यायां तद्विनाश-दुःखिता कृष्णाजिनमिव विभावती तिमिरोद्गममभिनवमवहत्। अपहाय मुनि-हृदयानि सर्वमन्यदन्धकारतां तिमिरमनयत्। क्रमेण च रविरस्तं गत इत्युदन्तमुपलभ्य जातवैराग्यो धौत-दुकूल-वल्कल-धवलाम्बरः सतारान्तःपुरः, पर्य्यन्तःस्थिततनु-तिमिर-तमाल-वन लेखम्, सप्तर्षिमण्डलाध्युषितम्, अरुन्धतीसञ्चरणपवित्रम्, उपहिताषाढम्, आलक्ष्यमाणमूलम्, एकान्तस्थितचारुताकमृगअमरलोकाश्रममिव गगनतलम् अमृत-दीधितिरध्यतिष्ठत्। चन्द्राभरणभृतस्तारकाकपाल-शकलालङ्कृतादम्बरतलात् त्र्यम्बकोत्तमाङ्गादिव गङ्गा सागरम् आपूरयन्ती हंस-धवला धरण्यामपतज्ज्योत्स्ना। हिमकर-सरसि विकच-पुण्डरीक-सिते चन्द्रिका-जलपान-लोभादवतीर्णो निश्चलमूर्त्तिरमृतपङ्कलग्न इवादृश्यत हरिणः। तिमिर-जलधर-समयापगमानन्तरम् अभिनव-सित-सिन्धुवार-कुसुम-पाण्डुरैरर्णवागतैरगाह्यन्त हंसैरिव कुमुद-सरांसि चन्द्रपादैः। विगलितसकलोदयरागं रजनिकर-बिम्बमम्बरापगावगाह-धौत- सिन्दूरमैरावत-कुम्भस्थलमिव तत्क्षणमलक्ष्यत। शनैः शनैस्च दूरोदिते भगवति हिमस्रुति सुधा धूलि-पटलेनेव धवलीकृते चन्द्रातपेन जगति, अवश्यायजलबिन्दु-मन्दगतिषु विघटमान-कुमुदवन कषाय-परिमलेषु समुपोढ-निद्रा-भरालस-तारकैरन्योन्य-प्रथित-पक्षपुटैरारब्ध-रोमन्थ-मन्थर-मुखैः सुखासी नैराश्रममृगैरभिनन्दितागमनेषु निशामुख-समीरणे अर्द्धयाममात्रावखण्डितायां विभावर्य्याम्, हारीतः कृताहारं मामादाय सर्वैस्तैः सह मुनिभिः उपसृत्य चन्द्रातपोद्भासिते तपोवनैकदेशे वेत्रासने सुखोपविष्टम् अनतिदूरवर्त्तिना जालपादनाम्ना शिष्येण दर्भपवित्र-धवित्र-पाणिना मन्दमन्दम् उपवीज्यमानं पितरमवोचत् ठहे तात! सकलेयमाश्चर्य्यश्रवण-कुतूहलाकलित-हृदया समुपस्थिता तापसपरिषदाबद्धमण्डला प्रतीक्षते व्यपनीतश्रमश्च कृतोऽयं पतित्रिपोतः, तदावेद्यतां यदनेन कृतमन्यस्मिन् जम्मनि को वाऽयमभूद्भविष्यति वेति। एवमुक्तस्तु स महामुनिरग्रतः स्थितं मामवलोक्य तांश्च सर्वानेकाग्रान् श्रवणपरान् मुनीन् बुद्ध्वा शनैः शनैरब्रवीत्- 'श्रूयतां यदि कौतूहलम्।

इति महाकविबाणभट्टविरचितायां कादम्बर्यां कथामुखम्।